पंजाब संस्करण

संस्कृत-साहित्य-सुधा

रामलाल सावल

मूल्य १॥।=)

पंजाब तथा राजस्थान की मैट्रिक में नियत

संस्कृत-साहित्य-सुधा

की 'सरलार्थदर्शिका'

कुञ्जी

लेखक—श्री लक्ष्मीनारायण शास्त्री, विद्याभास्कर

इस कुञ्जी में कठिन शब्दों के अर्थ, सरलार्थ और भावार्थ के साथ-साथ श्लोकों के अन्वय और प्रसंग भी खोल कर दिये गये हैं जिनसे मूल का अर्थ समझने में परम सहायता मिलती है। सभी अभ्यास पूरी तरह हल किये गये हैं और अन्त में कुछ प्रष्टव्य प्रश्न भी दिये गये हैं जिनसे आने वाले प्रश्नों के विषय और शैली का ज्ञान सुगमता से हो सकता है। पृष्ठ-संख्या २६४। सुन्दर छपाई। विद्यार्थियों के लिए मूल्य बहुत सस्ता केवल २।।) रुपया डाक व्यय सहित।

मिलने का पता— **मेहरचन्द्र लक्ष्मणदास,**

कूचा चेलां दरियागंज, दिल्ली।

निवेदन

प्रायः कहते हुए सुना जाता है कि पहले भारतवर्ष अत्यन्त उन्नति के शिखर पर था परन्तु अब अवनति की ओर अग्रसर होता हुआ अधःपतनोन्मुख हो रहा है। इसके कारण पर विचार किया जाय तो यही बुद्धिगम्य होता है कि यह सब कुछ संस्कृतभाषा की ओर से उपेक्षा तथा मृत भाषादि कह कर उसे हेय समझना ही है। पहला समय वह था जब कि आर्य-मात्र निष्कारण संस्कृतभाषा का अध्ययन करते थे और सर्वत्र सब देशों में सम्मानित होते थे। एक समय आज का है कि 'संस्कृत अतिक्लिष्ट भाषा है, इसके पढ़ने से कोई लाभ नहीं है' इत्यादि वाक्याडम्बर दिखलाते हुए या तो छात्र अध्ययन करते ही नहीं, यदि किसी प्रकार और विषय न मिलने के कारण, पाठ्य विषयों में चुन भी लिया तो व्याकरण रटते-रटते हतोत्साह हो जाते हैं या अन्यमनस्क होकर किसी प्रकार नोट आदि रट-रटाकर परीक्षोत्तीर्ण होने का प्रयत्न करते हैं; बोध की ओर ध्यान नहीं देते। यह समझ कर नहीं पढ़ते कि वेद-पुराणादि आर्य-संस्कृति-प्रतिपादक शास्त्र इसी भाषा में हैं अतः आर्यमात्र का जीवन अमर वाणी पर ही निर्भर है। इसमें विद्यार्थियों का ही अपराध नहीं है अध्यापकवर्ग ने भी पाठन-पद्धति को अति-दुरूह बना रक्खा है। यदि उस शिक्षा-प्रणाली में सुगमता ला दी जाय, या रोचकता प्रतिपादन की जाय तो विद्यार्थी बड़े उत्साह से पठनाभिलाषी बन अन्य विषयों को छोड़ इसी की ओर अग्रसर हों।

इसी विचार को हृदयंगम कर इस पुस्तक को प्रस्तुत किया जा रहा है। यह पुस्तक संस्कृत-साहित्य-समुद्र का मंथन कर छात्रों की अभिरुचि के अनुसार प्रस्तुत की गई है। इसमें कहीं गद्य का आनन्द है तो कहीं पद्य का—कहीं प्रहेलिका अपनी छटा दिखला रही हैं तो कहीं सामान्य नीति, कहीं नाटक मन को लुभा रहे हैं तो कहीं शिक्षाप्रद उपाख्यान। सारांश यह है कि इस छोटी-सी पुस्तक में मनोरंजन योग्य सभी सामग्रियों का समावेश किया गया है। इसके अतिरिक्त काम में आने योग्य व्याकरण भी विद्यार्थियों की सुगमता के लिए संक्षेप में सरल रीति का अवलम्बन कर लिखा गया है। साथ-साथ उदाहरण द्वारा स्पष्ट करने का प्रयत्न भी किया गया है।

क्लिष्टता दूर करने के लिए प्रत्येक पाठ के साथ कठिन शब्दों के अर्थ, अभ्यास के लिए प्रश्न तथा व्याकरण की कुछ बातें भी प्रश्न रूप में लिखी गई हैं। अभिप्राय यह है कि छात्रों के लाभ के लिए सभी बातों का इस पुस्तक में ध्यान रखा गया है। मेरा विश्वास है कि यह पुस्तक छात्रों की अभिरुचि को संस्कृत-अध्ययन की ओर अग्रसर करने में अत्यन्त उपयोगी सिद्ध होगी।

अन्त में यह निवेदन कर देना भी आवश्यक प्रतीत होता है कि यदि कोई सहृदय विद्वान् और भी सुगमता सरलता का ध्यान रखते हुए अभिरोचक सुझाव प्रदान करने की कृपा करेंगे तो अत्यन्त उपकार मानता हुआ कृतज्ञता प्रकाशन करूँगा।

—रामलाल सावल

विषय-सूची

मंगलाचरणम्	१	चित्र-श्लोकाः	७८
लोकोक्तयः	४	लोकविद्य-कथा	८२
नीतिश्लोकाः	८	युद्धवीर-कथा	९१
पुष्पोद्भव-जन्म-कथा	१२	इन्दुमती-स्वयंवरः	९९
पाण्डव-सभा	१६	गोपालकृष्णगोखले	१०३
शमोपदेशः	२१	सुभाषितपद्यानि	१०७
सन्ध्या, चन्द्रवर्णनम्	२४	प्रह्लादोपाख्यानम्	१११
संस्कृतभाषयैव भारतोद्धारः	२८	चण्डरव-शृगाल-कथा	११७
विद्यार्थि-नियमाः	३१	लोभाविष्ट-सिद्धिच्युत-चक्रधर-कथा	१२१
ससेमिरा-उपाख्यानम्	३४	प्रहेलिका	१२९
श्रीरघु-जन्म	४१	रावणाय श्रीपवनतनय-कृतोपदेशः	१३१
उपमन्योरुपाख्यानम्	४५	कौटिल्यः	१३५
रति-विलापः	५०	पुत्रविजयः	१४०
कन्या-परीक्षा	५५	दुष्यन्तस्य स्वपुत्रावाप्तिः	१४४
प्रश्नोत्तरी	५८	रावणाङ्गदसंलापः	१५०
भारत-गौरवम्	६३	हिमवन्नगर-शोभादि-वर्णनम्	१५५
भारत-गीतिका	६७		
जठरनिरूपणम्	६९		
ध्रुवोपाख्यानम्	७३		

संस्कृत-साहित्य-सुधा

मंगलाचरणम्

शब्दार्थ

मकरन्द = पुष्परस, मिलिन्द = भौंरा, अपास्त = नष्ट, हेरम्ब = श्रीगणेश। व्याजाद् = बहाने से, वारिभवोद्भव = ब्रह्मा, पञ्चशर = कामदेव, नागाननः = श्रीगणेश। स्फाटिकी = स्फटिक मणि की बनी हुई, विभिन्न = युक्त, दाडिमीबीजबुद्ध्या = अनार के दाने समझ कर, कीर = तोता। निकषग्रावा = कसौटी, मतिहेम्नः = बुद्धिरूपी सुवर्ण की, प्राज्ञेतर = मूर्ख। संसृति = संसार। भीति = भय, भुजङ्ग-पुङ्गव = भयानक सर्प, कपालदामलुलनात् = कपालों की माला के हिलने से। उद्वेग = घबराहट, चिति = चिता। निर्माति = पैदा करता है, विभर्ति = पालन करता है, संहरति = नाश करता है, वीक्षते = देखता है। सुधापरतरा = अमृत से भी बढ़कर, गीर्वाण = देवता अपुनर्भवम् = मोक्ष। आर्ति = दुःख।

आनन्दमात्र-मकरन्दममन्दगन्धं
योगीन्द्र-सुस्थिर-मिलिन्दमपास्तबन्धम्।
वेदान्त-सूर्य-किरणैकविकाशशीलं
हेरम्ब-पाद-शरदम्बुजमानतोऽस्मि ॥१॥

जेतुं यस्त्रिपुरं हरेण, हरिणा व्याजाद् बलिं बध्नता
स्रष्टुं वारिभवोद्भवेन भुवनं, शेषेण धर्तुं धराम्।

पार्वत्या महिषासुरप्रमथने, सिद्धाधिपैः सिद्धये
ध्यातः पञ्चशरेण विश्वजितये पायात् स नागाननः ॥२॥

तव करकमलस्थां स्फाटिकीमक्षमालां
नखकिरणविभिन्नां दाडिमीबीजबुद्ध्या ।
प्रतिकलमनुकर्षन् येन कीरो निषिद्धः
स भवतु मम भूत्यै वाणि ! ते मन्दहासः ॥३॥

पातु वो निकषग्रावा मतिहेम्नः सरस्वती ।
प्राज्ञेतर-परिच्छेदं वचसैव करोति या ॥४॥

येनाकारि करी कृपाकुलतया निर्मुक्तकष्टः क्षणाद्
येनाधारि गिरिश्च वत्सलतया पातुं निजं गोकुलम् ।
तेनैवाशु करेण संसृतिमहासिन्धोः समुद्धारणं
कुर्याः केशव ! दीर्घदुर्गतिदशाधीनस्य दीनस्य मे ॥५॥

भीतिर्नास्ति भुजङ्गपुङ्गवविषात् प्रीतिर्न चन्द्रामृतान्-
नाशौचं हि कपालदामलुलनाच्छौचं न गङ्गाजलात् ।
नोद्वेगं चितिभस्मना न च सुखं गौरीस्तनालिङ्गना-
दात्मारामतया हिताहितसमः श्रीशङ्करः पातु माम् ॥६॥

अशेषलङ्कापति-सैन्यहन्ता श्रीरामसेवाचरणैककर्ता ।
अनेकदुःखाहतलोकगोप्ता त्वसौ हनूमान्मम सौख्यकर्ता ॥७॥

यो निर्माति बिभर्ति संहरति च ब्रह्मादिमूर्त्या जगद्
वह्नि-व्योम-वसुन्धरास्बु-पवना यस्यापरा मूर्तयः ।
यो बाह्यान्तर-सर्वदिक्षु विहरन्नेकोऽखिलं वीक्षते
यः सर्वाश्रयभूरचिन्त्य-महिमा देवाय तस्मै नमः ॥८॥

धन्यं भारतभूतलं प्रियतमं सारस्वतं मन्दिरं
धन्या संस्कृतवाक् सुधापरतरा गीर्वाणसंसेविता ।
धन्याः सर्वगुणाकराः सुकविता-पाण्डित्यसंमण्डिताः
तेषामुद्भटभाषितं क्षितितले जीयात् समाः शाश्वतीः ॥९॥

न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।
कामये दुःखतप्तानां प्राणिनामार्तिनाशनम् ॥१०॥

एतावज्जन्मसाफल्यं देहिनामिह देहिषु ।
प्राणैरर्थैर्धिया वाचा श्रेय एवाचरेत्सदा ॥११॥

अभ्यास

१. मङ्गलाचरण क्यों किया जाता है, मङ्गलाचरण कितने प्रकार का होता है ?

२. चतुर्थ पद्य का भावार्थ समझाओ ।

३. प्रथमादि पद्यों में आये हुए समस्त पदों का विग्रह लिखो ।

४. अधोलिखित पदों में सन्धिविच्छेद करो—

आनतोऽस्मि, वारिभवोद्भवेन, कीरो निषिद्धः, स भवतु, वचसैव, येनाकारि, भीतिर्नास्ति, लुलनाच्छौचम्, विहरन्नेकोऽखिलम् ।

५ वाच्य-परिवर्तन करो—श्रीशङ्करः माम् पातु ।

लोकोक्तयः

शब्दार्थ

अक्षोभ्यता एव = न घबराना ही, तिरस्क्रिया = अपमान । आर्जवम् = सीधापन । त्यक्तलज्जः = लाज छोड़े हुए । परसदननिविष्टः = दूसरे के स्थान पर जाने वाला, मोघा = निष्फल । वयः = उम्र । अतिक्रमः = उल्लंघन, अपमान । विप्रलापी = बकवादी । वाग्मिता = सुन्दर बोलने का भाव ।

१. अक्षोभ्यतैव महतां महत्त्वस्य हि लक्षणम् ।

२. विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।

३. अप्रकटीकृतशक्तिः शक्तोऽपि तिरस्क्रियां लभते ।

४. अजीर्णे भोजनं विषम् ।

५. अङ्गीकृतं सुकृतिनः परिपालयन्ति ।

६. आर्जवं हि कुटिलेषु न नीतिः ।

७. अन्यस्माल्लब्धपदो नीचः प्रायेण दुःसहो भवति ।

८. आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ।

९. परसदननिविष्टः को लघुत्वं न याति ।

१०. याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।

११. इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः ।

१२. उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।

१३. ईर्ष्या हि विवेकपरिपन्थिनी ।

१४. इतो भ्रष्टस्ततो भ्रष्टः ।

१५. उदारचरितानां तु वसुधैव कुटुम्बकम् ।

१६. उद्योगः पुरुषलक्षणम् ।

१७. क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ।

१८. एकचित्ते द्वयोरेव किमसाध्यं भवेदिति ।

१९. एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणे-ष्विवाङ्कः ।

२०. ऋद्धिश्चित्तविकारिणी ।

२१. दारिद्र्यदोषो गुणराशिनाशी ।

२२. को न याति वशं लोके मुखे पिण्डेन पूरितः ।

२३. क्रिया हि वस्तूपहिता प्रसीदति ।

२४. क्रुद्धे विधौ भजति मित्रममित्रभावम् ।

२५. चिन्तासमं नास्ति शरीरशोषणम् ।

२६. चौरे गते वा किमु सावधानम् ।

२७. गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ।

२८. चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ।

२९. तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम् ।

३०. दिशत्यपायं हि सतामतिक्रमः ।

३१. दारिद्र्यं परमञ्जनम् ।

३२. धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।

३३. दोषोऽपि गुणतां याति प्रभोर्भवति चेत्कृपा ।

३४. नहि परिचयो मलिनात्मनां प्रधानम् ।

३५. नहि कृतमुपकारं साधवो विस्मरन्ति ।

३६. पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ।

३७. बहुवचनमल्पसारं यः कथयति विप्रलापी सः ।

३८. महानपि प्रसंगेन नीचं सेवितुमिच्छति ।

३९. मितं च सारं च वचो हि वाग्मिता ।

४०. या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ।

४१. युक्तियुक्तं वचो ग्राह्यं बालादपि विचक्षणैः ।

४२. विद्वान् कुलीनो न करोति गर्वम् ।

४३. सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।

४४. स्त्रियाश्चरित्रं पुरुषस्य भाग्यं देवो न जानाति कुतो मनुष्यः ।

४५. मौनं सर्वार्थसाधकम् ।

अभ्यास

१. लोकोक्तियों से तुम क्या समझते हो ? लोकोक्तियों का प्रयोग किस प्रकार किया जाता है ?

२. निम्नलिखित लोकोक्तियों का प्रयोग करो—

६, ९, १०, १२, १८, २२ इत्यादि ।

३. अधोलिखित लोकोक्तियों का भावार्थ स्पष्ट करो—

२२, ३१, ३४, ३८, ४०, ४२, ४५ इत्यादि ।

नीतिश्लोकाः

शब्दार्थ

कृत्स्नम् = पूर्ण रीति से, नावसीदति = दुःखी नहीं होता। सुस्थिर = सुखी। प्रतिक्रिया = उपाय। लोकरव = निन्दा। प्रवासी = परदेश में रहने वाला। दोषाकर = (दोषों की खान, या निशा को करने वाला), मित्र = सूर्य, दोस्त।

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते।
स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति ॥१॥
सम्पदा सुस्थिरं मन्यो भवति स्वल्पयापि यः।
कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम् ॥२॥
चिन्तनीया हि विपदामादावेव प्रतिक्रिया।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥३॥
नालसाः प्राप्नुवन्त्यर्थान् न शठा न च मायिनः।
न च लोकरवाद् भीताः न च शश्वत् प्रतीक्षिणः ॥४॥
अवृत्तिकं त्यजेद्देशं वृत्तिं सोपद्रवां त्यजेत्।
त्यजेन् मायाविनं मित्रं धनं प्राणहरं त्यजेत् ॥५॥
पादाहतं यदुत्थाय मूर्धानमधिरोहति।
स्वस्थादेवापमानेऽपि देहिनस्तद् वरं रजः ॥६॥

सौहृदेन परित्यक्तं निःस्नेहं खलवत्त्यजेत् ।
सोदरं भ्रातरमपि किमुतान्यं पृथग् जनम् ॥७॥
यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥८॥
दूरस्थं जलमध्यस्थं धावन्तं धनगर्वितम् ।
क्रोधवन्तं मदोन्मत्तं नमस्कारेऽपि वर्जयेत् ॥९॥
आत्मबुद्धिः सुखायैव गुरुबुद्धिर्विशेषतः ।
परबुद्धिर्विनाशाय स्त्रीबुद्धिः प्रलयावहा ॥१०॥
जीवन्तोऽपि मृताः पञ्च व्यासेन परिकीर्तिताः ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥११॥
सदयं हृदयं यस्य भाषितं सत्यभूषितम् ।
कायः परहिते यस्य सफलं तस्य जीवनम् ॥१२॥

यो नात्मना न च परेण च भृत्यवर्गे,
दीने दयां न कुरुते न च बन्धुवर्गे ।
किं तस्य जीवितफलं हि मनुष्यलोके,
काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥१३॥

आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा वृद्धिमती च पश्चात् ।

दिनस्य पूर्वार्द्ध - परार्द्धभिन्ना,
छायेव मैत्री खल-सज्जनानाम् ॥१४॥

न स्वल्पमप्यध्यवसायभीरोः,
करोति विज्ञानविधिर्गुणं हि ।
अन्धस्य किं हस्ततलस्थितोऽपि,
प्रकाशयत्यर्थमिह प्रदीपः ॥१५॥

न वेत्ति यो यस्य गुणप्रकर्षं,
स तं सदा निन्दति नात्र चित्रम् ।
यथा किराती करिकुम्भजातां,
मुक्तां परित्यज्य बिभर्ति गुञ्जाम् ॥१६॥

किं कोकिलस्य विरुतेन गते वसन्ते,
किं कातरस्य बहुशस्त्रपरिग्रहेण ।
मित्रेण किं व्यसनकाल-पराङ्मुखेन,
किं जीवितेन पुरुषस्य निरक्षरेण ॥१७॥

दोषाकरोऽपि कुटिलोऽपि कलङ्कितोऽपि,
मित्रावसानसमये विहितोदयोऽपि ।
चन्द्रस्तथापि हरवल्लभतामुपैति,
नैवाश्रितेषु गुणदोषविचारणं स्यात् ॥१८॥

मौनान्मूर्खः प्रवचनपटुर्वातुलो जल्पको वा,
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे वसति नियतं दूरतश्चाप्रगल्भः,
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥१९॥

अभ्यास

१. निम्नलिखित श्लोकों के अर्थ लिखो—
२, ४, ६, ९, १३, १४, १८ ।

२. व्यास ने किन-किन मनुष्यों को जीते हुए भी मरा हुआ कहा है ? किन-किन मनुष्यों का जीवन व्यर्थ है ? कौन-कौन मनुष्य धन नहीं पा सकते ? सेवा-धर्म को परमगहन क्यों लिखा है ? किन वस्तुओं का त्याग श्रेष्ठ है ?

३. सन्धिविश्लेषण कीजिये—
छायेव, काकोऽपि, नालसाः, त्यजेन्मायाविनम् इत्यादि ।

४. विग्रह सहित समास लिखो—
कूपखननम्, सोदरम्, न्यायप्रवृत्तस्य, मदोन्मत्तम्, परबुद्धिः, सदयम्, सत्यभूषितम्, अध्यवसायभीरोः, विज्ञानविधिः इत्यादि ।

५. वाच्य-परिवर्तन करो—प्रदीपः अर्थम् प्रकाशयति ।

पुष्पोद्भव-जन्मकथा

शब्दार्थ

पुरः = सामने। निक्षिप्य = रखकर, बिठाकर। प्रत्यागच्छता = लौटते हुए, काननावनौ = जंगल में। विलोक्य = देखकर, अभाणि = कहा, स्थविरे = बुड्ढी, अटवी = जंगल, आयास = कष्ट, भ्रान्तभूवलयः = समस्त पृथ्वी पर घूमने वाला। अनुनीय = प्रार्थना-विनयादि द्वारा प्रसन्न करके। प्रवहणम् = स्त्रियों के बैठने योग्य सवारी, कल्लोल = बड़ी बड़ी लहरें। पोतः = जहाज़। धात्री = धाय। फलकम् = तख़्ता। प्रसववेदना = बच्चा पैदा होते समय की पीड़ा। विचेतना = बेहोश। वन्यो वारणः = जंगली हाथी। निपात्य = पटक कर। लतागुल्मके = झाड़ी में, कण्ठीरव = सिंह, दन्तावलेन = हाथी ने। अवनीरुहात् = वृक्ष से।

कदाचिद् वामदेवशिष्यः सोमदेवशर्मा नाम कश्चिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत—देव ! रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि—स्थविरे ! का त्वम् ? एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसीति। वृद्धयाप्यभाषि—"मुनिवर !

कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति । तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामै- तस्माद् द्वीपादागतो मगधनाथमन्त्रिसम्भवो रत्नोद्- भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहारी उपगम्य सुवस्तुसम्पदा श्वशुरेण सम्मानितोऽभूत् । कालक्रमेण नताङ्गी गर्भिणी जाता । ततः सादरविलोकन- कुतूहलेन रत्नोद्भवः कथंचिच्छ्वशुरमनुनीय चपललोचनया तया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे । कल्लोलमालि- काभिहतः पोतः समुद्राम्भस्यमज्जत् । गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेक- मधिरुह्य दैवगत्या तीरभूमिमगमम् । सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद् वा न जानामि । क्लेशस्य परां काष्ठामधिगता सुवृत्तास्मिन्नटवी- मध्येऽद्य सुतमसूत । प्रसववेदनया विचेतना सा प्रच्छाय- शीतले तरुतले निवसति । विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारो- ऽप्यानायि इति । तस्मिन्नेव क्षणे वन्यो वारणः कश्चिदद्- श्यत तं । विलोक्य भीता सा बालकं निपात्य प्राद्रवत् । अहं

समीपलतागुल्मके प्रविश्य परीक्षमाणोऽतिष्ठम् । निपतितं बालकं पल्लवकवलमिवाददति गजपतौ कण्ठीरवो भीमरवो महाग्रहेण न्यपतत् । भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत् । चिरायुष्मत्तया स चोन्नततरुशाखां समासीनेन वानरेण केनचित् पक्वफलबुद्ध्या परिगृह्य फलेतरतया विततस्कंधमूले निक्षिप्तोऽभूत् । सोऽपि मर्कटः क्वचिदगात् । बालकेन सत्त्वसम्पन्नतया सकलक्लेशसहेनाभावि । केसरिणा करिणं निहत्य कुत्रचिदगामि । लतागृहान्निर्गतोऽहमपि तेजःपुञ्जं बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटमानीतवानस्मि" इति । सर्वेषां सुहृदामेकदैवानुकूलदैवाभावेन महदाश्चर्यं बिभ्राणो राजा "रत्नोद्भवः कथमभवत्" इति चिन्तयँस्तन्नन्दनं पुष्पोद्भवनामधेयं विधाय तदुदन्तं व्याख्याय सुश्रुताय विषादसंतोषावनुभवँस्तदनुजतनयं समर्पितवान् ।

अभ्यास

१. इस कथा का सारांश अपनी भाषा में लिखो ।

२. मुनि के पूछने पर वृद्धा ने क्या उत्तर दिया ? बालक को

लाने वाला कौन था ? वह वृद्धा कौन थी जो बालक को लेकर आ रही थी ?

३. सन्धि-पृथककरण कीजिये—

पुरो निक्षिप्य। काननावनौ। एतस्मिन्नटवी। तन्नन्दिनीम्। कथञ्चिच्छ्वशुरम्। समुद्राम्भस्यमज्जत्। कुमारोप्यानायि। तस्मिन्नेव। बालको न्यपतत्। सोऽपि। गृहान्निर्गतोऽहम्। चिन्तयँस्तन्नन्दनम्।

४. विग्रह सहित समास लिखिये—

उज्ज्वलाकारम्, सादरम्, तन्नन्दिनीम्, नयनानन्दकारिणीम्, रमणीयगुणालयः, भ्रान्तभूवलयः, चपललोचनया, गर्भभरालसाम्, विचेतना, भीमरवः, महाग्रहेण इत्यादि।

५. वाच्य-परिवर्तन करो—मया कुमारोऽप्यानायि।

पाण्डव-सभा

शब्दार्थ

शातकुम्भमयद्रुमा = सोने के बने हुए वृक्षों वाली; अभिम्नतीव = प्रभाहीन-सी करती हुई, सुकृता = बनाई हुई, सुधर्मा = देवताओं की सभा, दाशार्हों = यादवों की सभा, अन्तरिक्षचराः = आकाश में घूमने वाले, अप्रतिमाम् = अनोखी, द्विजगण = पक्षी-समूह, शकुनि = दुर्योधन का मामा, नागसाह्वये = हस्तिनापुर में । धार्त्तराष्ट्रः = दुर्योधन, व्रीडित = लज्जित, अमर्षणः = असहनशील, व्याघूर्णित इव = चक्कर आया हुआ-सा । प्रलंभ = धोखा ।

सभा च सा महाराज ! शातकुम्भमयद्रुमा ।
दशकिष्कुसहस्राणि समन्तादायताभवत् ॥१॥
अभिम्नतीव प्रभया प्रभामर्कस्य भास्वराम् ।
प्रबभौ ज्वलमानेव दिव्या दिव्येन वर्चसा ॥२॥
नवमेघप्रतीकाशा दिवमावृत्य विष्ठिता ।
आयता विपुला रम्या विपाप्मा विगतक्लमा ॥३॥
उत्तमद्रव्यसम्पन्ना रत्नप्राकारतोरणा ।
बहुचित्रा बहुधना सुकृता विश्वकर्मणा ॥४॥
न दाशार्हा सुधर्मा वा ब्रह्मणो वाथ तादृशी ।
सभारूपेण सम्पन्नां यां चक्रे मतिमान्मयः ॥५॥

तां स्म तत्र मयेनोक्तां रक्षन्ति च वहन्ति च ।
समामष्टौ सहस्राणि किङ्करा नाम राक्षसाः ॥६॥
अन्तरिक्षचरा घोरा महाकाया महाबलाः ।
तस्यां सभायां नलिनीं चकार प्रतिमां मयः ॥७॥
वैदूर्यपत्रविततां मणिनालोज्ज्वलाम्बुजाम् ।
पद्मसौगन्धिकवतीं नानाद्विजगणायुताम् ॥८॥
पुष्पितैः पङ्कजैश्चित्रां कूर्मैर्मत्स्यैश्च काञ्चनैः ।
चित्रस्फटिकसोपानां निष्पङ्क-सलिलां शुभाम् ॥९॥
मन्दानिल-समुद्धूतां मुक्ताबिन्दुभिराचिताम् ।
महामणि-शिलापट्ट-बद्ध-पर्यन्तवेदिकाम् ॥१०॥
मणिरत्नचितां तान्तु केचिदभ्येत्य पार्थिवाः ।
दृष्ट्वापि नाभ्यजानन्त तेऽज्ञानात्प्रपतन्त्युत ॥११॥
तां सभामभितो नित्यं पुष्पवन्तो महाद्रुमाः ।
आसन्नानाविधा लीलाः शीतच्छायामनोरमाः ॥१२॥
काननानि सुगन्धीनि पुष्करिण्यश्च सर्वशः ।
हंस-कारण्डवोपेताश्चक्रवाकोपशोभिताः ॥१३॥
जलजानां च पद्मानां स्थलजानां च सर्वशः ।
मारुतो गन्धमादाय पाण्डवान् स्म निषेवते ॥१४॥

ईदृशीं तां सभां कृत्वा मासैः परि चतुर्दशैः ।
निष्ठितां धर्मराजाय मयो राजन्न्यवेदयत् ॥१५॥
वसन् दुर्योधनस्तस्यां सभायां पुरुषर्षभः ।
शनैर्ददर्श तां सर्वां सभां शकुनिना सह ॥१६॥
तस्यां दिव्यानभिप्रायान् ददर्श कुरुनन्दनः ।
न दृष्टपूर्वा ये तेन नगरे नागसाह्वये ॥१७॥
स कदाचित् सभामध्ये धार्तराष्ट्रो महीपतिः ।
स्फाटिकं स्थलमासाद्य जलमित्यभिशङ्कया ॥१८॥
स्ववस्त्रोत्कर्षणं राजा कृतवान् बुद्धिमोहितः ।
ततः स्थले निपततो दुर्मना व्रीडितो नृपः ॥१९॥
ततः स्फाटिकतोयां वै स्फाटिकाम्बुजशोभिताम् ।
वापीं मत्वा स्थलमिव सवासाः प्रापतज्जले ॥२०॥
जले निपतितं दृष्ट्वा भीमसेनो महाबलः ।
जहास जहसुश्चैव किंकराश्च सुयोधनम् ॥२१॥
नामर्षयत् ततस्तेषामवहासममर्षणः ।
आकारं रक्षमाणस्तु न स तान् समुदैक्षत ॥२२॥
पुनर्वसनमुत्क्षिप्य प्रतरिष्यन्निव स्थलम् ।
आरुरोह ततः सर्वे जहसुश्च पुनर्जनाः ॥२३॥

द्वारं तु पिहिताकारं स्फाटिकं प्रेक्ष्य भूमिपः ।
प्रविशन्नाहतो मूर्ध्नि व्याघूर्णित इव स्थितः ॥२४॥
तादृशं च परं द्वारं स्फाटिकोरुकपाटकम् ।
विघट्टयन् कराभ्यां तु निष्क्रम्याग्रे पपात ह ॥२५॥
द्वारं तु विततताकारं समापेदे पुनश्च सः ।
तद्वृत्तं चेति मन्वानो द्वारस्थानादुपारमत् ॥२६॥
एवं प्रलम्भान् विविधान् प्राप्य तत्र विशांपते ।
पाण्डवैश्चाभ्यनुज्ञातस्ततो दुर्योधनो नृपः ॥२७॥
अप्रहृष्टेन मनसा राजसूये महाक्रतौ ।
प्रेक्ष्य तामद्भुतामृद्धिं जगाम गजसाह्वयम् ॥२८॥

अभ्यास

१. पाण्डवसभा का वर्णन अपनी भाषा में लिखो। यह सभा किसने बनाई थी ? इस सभा में क्या विशेषता थी ? दुर्योधन की हँसी भीमादि ने क्यों की ? दुर्योधन के प्रसन्न न होने का क्या कारण था ? दुर्योधन ने कहाँ-कहाँ धोखा खाया ?

२. सन्धि-विच्छेद करो—ज्वलमानेव, ब्राह्मणो वाथ, मन्दानिल, शीतच्छाया, केचिदभ्येत्य, तेऽज्ञानात् इत्यादि ।

३. सविग्रह समास लिखिए—विगतक्लमाः, बहुधनाः, महाकायाः, मणिनालोज्ज्वलाम्बुजाम्, निष्पङ्कसलिलाम्, महामणिशिलापट्टबद्धपर्यन्तवेदिकाम् इत्यादि ।

४ सह के योग में कौन-सी विभक्ति आती है? क्रिया के साथ 'स्म' क्यों लगाया जाता है?

५. प्रकृति-प्रत्यय-विश्लेषण कीजिये—

प्रेक्ष्य, निष्क्रम्य, कृतवान्, मन्वानः, वसन, दृष्ट्वा, व्रीडितः।

तपोवनमृगा ह्येते वेदितीर्थेषु शेरते ।
संप्रवृत्ता निशा सीते नक्षत्रसमलंकृता ॥
ज्योत्स्नाप्रावरणश्चन्द्रो दृश्यते ह्युदितोऽम्बरे ॥६॥

ततः स मध्यंगतमंशुमन्तं,
ज्योत्स्ना-वितानं महदुद्वमन्तम् ।
ददर्श धीमान् दिवि भानुमन्तं,
गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥७॥

लोकस्य पापानि विनाशयन्तं,
महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं,
ददर्श शीतांशुमथाभियान्तम् ॥८॥

या भाति लक्ष्मीर्भुवि मन्दरस्था,
तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था,
रराज सा चारुनिशाकरस्था ॥९॥

हंसो यथा राजतपञ्जरस्थः,
सिंहो यथा मन्दरकन्दरस्थः ।
वीरो यथा गर्वितकुञ्जरस्थः,
चन्द्रो विराजाज तथाम्बरस्थः ॥१०॥

स्थितः ककुद्मानिव तीक्ष्णशृंगो,
महाचलः श्वेत इवोच्चशृंगः ।
हस्तीव जाम्बूनदबद्धशृंगो,
रराज चन्द्रः परिपूर्णशृंगः ॥११॥

विनष्ट - शीताम्बु - तुषार - पङ्को,
महाग्रहग्राह - विनष्ट - पङ्कः ।
प्रकाशलक्ष्म्याश्रयनिर्मलांको,
रराज चन्द्रो भगवान् शशांकः ॥१२॥

शिलातलं प्राप्य यथा मृगेन्द्रो,
महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्रो,
तथा प्रकाशो विरराज चन्द्रः ॥१३॥

प्रकाशचन्द्रोदय - नष्टदोषः,
प्रवृत्तरक्षः - पिशिताशदोषः ।
रामाभिरामेरितचित्तदोषः,
स्वर्ग-प्रकाशो भगवान् प्रदोषः ॥१४॥

अभ्यास

१. सन्ध्या तथा चन्द्रवर्णन अपनी भाषा में लिखो, चन्द्रमा को किन-किन की उपमा दी गई है ?

२. प्रकृति-प्रत्यय-विश्लेषण कीजिए—उपोह्य, संप्रवृत्ता, ततः, भानुमन्तम्, भ्रमन्तम्, गर्वितः, स्थितः, विनष्टः।

३. सन्धि-विच्छेद कीजिए—रविरस्तंगतः, निद्रार्थं, साप्यभिषेकार्द्राः, कपोताङ्गारुणो धूमो दृश्यते, तथैव इत्यादि।

४. सविग्रह समास लिखिए—अभिषेकार्द्राः, कलशोद्यताः, सलिलाप्लुतवल्कलाः, अल्पपर्णाः, ज्योत्स्नाप्रावरणः, महोदधिम् इत्यादि।

संस्कृतभाषयैव भारतोद्धारः

शब्दार्थ

प्रस्तरेष्टकानिर्मितानाम् = पत्थर तथा ईंटों से बने हुए। प्रयोजनीयता = प्रयोग में लाने योग्य होना। चरमोऽवधि = अन्तिम सीमा, अवनतम् = नीचे गिरा हुआ, सुगूढम् = अत्यन्त गुप्त, आस्थविरम् = बुड्ढे तक। गीर्वाणवाणी = संस्कृत।

भारतमिति नाम प्रस्तरेष्टका-निर्मितानां गृहाणां नाम नास्ति, भारतोत्पन्ना प्रजैव भारतम्। तस्याः कथमुद्धारः स्यात्? तत्रोपायो धर्माचरणम्, धर्मः कथं शिक्षितः स्यात्? तत्र धर्मशास्त्राणां प्रयोजनीयता। धर्मशास्त्रमर्मं कथं ज्ञायेत? यावत् संस्कृतभाषा शिक्षिता न स्यात्। संस्कृतभाषाज्ञाने वेदानां स्मृतीनां च ज्ञानं जायते। ततश्चेतिहासज्ञानेन सदाचारज्ञानम्, सदाचारेण लाभः, कदाचारेण हानिरिति सम्यगवबुध्येत। संस्कृतभाषिकेष्वेव रामायण-महाभारतेषु उद्धारस्य सर्वा सामग्री निहिता, सभ्यतायास्तत्र चरमोऽवधिर्निरूपितः, पुरास्मदीयं भारतं सर्वथोन्नतिधामासीत्। साम्प्रतं चावनतं वर्तते तत्र को हेतुः, एतद्विचारणेऽन्यधर्माणोऽपि मुक्तकण्ठं वदेयुः—अद्यत्वे

सा भारती सभ्यता भारतीयेषु नैव लोचनगोचरीभवति। एतदेव कारणं यद् महामहिमशालिनो भारतस्य पतनं संवृत्तम्। सा भारती सभ्यताऽस्माकं प्राचीनैरस्मदनुजिघृक्षुभिर्मुनिवरैरतिप्रयत्नेन ग्रन्थेषु संस्कृतभाषायां सुगूढमुपदिष्टा। अतो यदि भारतवासिनो भारतस्य वास्तविकमुद्धारं वाञ्छन्ति पुनरपि पूर्ववदखिलशिरोमणितामभिलषन्ति तर्हि तैरावालाद् आस्थविरमेषैव गीर्वाणवाणी प्रचारणीया। तज्ज्ञानेन सा स्वाभ्यन्तरस्थां सभ्यताम् (यया भारतं प्राक् समुन्नामं डुढौके) अस्मभ्यं समर्पयिष्यति। सभ्यताप्राप्त्यैवास्माकीनोद्धारो भविष्यति, वयमेव भारतवर्षम्, तर्ह्यस्माकमुद्धारे जाते भारतस्योद्धारो व्यपदिश्येत—एतेन सिद्ध्यते यत् संस्कृतभाषयैव भारतस्योद्धारो भवितुमर्हतीति सुरम्या सुललिता सर्वार्थसाधिका गीर्वाणवाणी सकलैरध्येया।

अभ्यास

१. इस लेख में किन-किन युक्तियों से भारत के उद्धार में संस्कृत को सहायक बताया है? सदाचार से लाभ तथा दुराचार से हानि होती है, इस पर अपने विचार प्रकट करो।

२. सन्धि-विश्लेषण करो—प्रजैव, तत्रोपायो धर्माचरणम्,

ततश्चेति, चरमोऽवधिः, सर्वोन्नतिधामासीत्, को हेतुः, नैव, एतद्विचारणेऽन्यधर्माणोऽपि इत्यादि ।

३. इस पाठ में आये हुए समासयुक्त पदों के सविग्रह समास बतलाइये ।

४. वाच्य-परिवर्तन करो—गीर्वाणवाणी सकलैरध्येया ।

———

विद्यार्थि-नियमाः

शब्दार्थ

प्रेरितः = आज्ञा दिया गया, नियम्य = वश में रख कर, आस्यताम् = बैठिये, आसीत = बैठे । अभिमुखम् = सामने, न तिष्ठन् = अन्यमनस्क होकर बैठा हुआ, नीचम् = नीचा । परीवादः = विद्यमान दोषों का कथन, निन्दा = अविद्यमान दोषों का कथन, पिधातव्यौ = कान बन्द कर लेने चाहिएँ, फलक = बैंच, स्रस्तर = छत्त । अनिसृष्ट = बिना आज्ञा दिये हुए ।

प्रेरितो गुरुणा नित्यं तथाऽप्रेरित एव वा ।
कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च ॥१॥
शरीरं चैव वाचं च बुद्धीन्द्रिय-मनांसि च ।
नियम्य प्राञ्जलिस्तिष्ठेद् वीक्षमाणो गुरोर्मुखम् ॥२॥
नित्यमुद्धृतपाणिः स्यात् साध्वाचार-सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥३॥
हीनान्नवस्त्रवेषः स्यात् सर्वथा गुरुसन्निधौ ।
उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत् ॥४॥
प्रतिश्रवणसंभाषे शयानो न समाचरेत् ।

नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥५॥
आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः ।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद् धावंस्तु धावतः ॥६॥
नोच्चं शय्यासनं चास्य सर्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ॥७॥
नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्वीत गति - भाषित - चेष्टितम् ॥८॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥९॥
गोऽश्वोष्ट्रयान-प्रासाद-स्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्धं शिलाफलक-नौषु च ॥१०॥
गुरोर्गुरौ सन्निहिते गुरुवद् वृत्तिमाचरेत् ।
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥११॥

अभ्यास

१. अध्ययन के कौन-कौन-से नियम हैं ? कैसे बैठकर पढ़ना चाहिए ? गुरु का नाम क्यों नहीं लेना चाहिए ? गुरु की नकल करनी चाहिए या नहीं ? जहाँ गुरु की निन्दा होती हो वहाँ क्या करना चाहिए ? निन्दा तथा परीवाद में क्या अन्तर है ? छात्र गुरु के साथ एकासन पर कहाँ-कहाँ बैठ सकता है ?

श्रीरघुजन्म

शब्दार्थ

प्रसेदुः = निर्मल हुईं। मरुतः = वायु। भवः = जन्म। अरिष्ट-शय्या = प्रसूति-शय्या। हतत्विषः = कांतिहीन। शुद्धान्तचराय = रनिवास में जाने योग्य पुरुष। सुखश्रवाः = सुनने में सुख देने वाले शब्द। सद्मनि = महल में। दिवौकसाम् = देवताओं के। संयतः = कैदी। परेषाम् = शत्रुओं के। हरिदश्वदीधितेः = सूर्य की किरणों के। शरजन्मना = कार्तिकेय। रथाङ्गनाम्नोः = चकवा चकवी का। विपश्चित = पण्डित।

दिशः प्रसेदुर्मरुतो ववुः सुखाः,
प्रदक्षिणार्चिर्हविरग्निराददे ।
बभूव सर्वं शुभशंसि तत्क्षणं,
भवो हि लोकाभ्युदयाय तादृशाम् ॥१॥

अरिष्टशय्यां परितो विसारिणा,
सुजन्मनस्तस्य निजेन तेजसा ।
निशीथदीपाः सहसा हतत्विषो
बभूवुरालेख्य - समर्पिता इव ॥२॥

जनाय शुद्धान्तचराय शंसते,
कुमारजन्मामृतसम्मिताक्षरम् ।
अदेयमासीत्त्रयमेव भूपतेः,
शशिप्रभं छत्रमुभे च चामरे ॥३॥
निवातपद्मस्तिमितेन चक्षुषा,
नृपस्य कान्तं पिबतः सुताननम् ।
महोदधेः पूर इवेन्दुदर्शनाद्,
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥४॥
सुखश्रवा मंगलतूर्य-निस्वनाः,
प्रमोदनृत्यैः सह वारयोषिताम् ।
न केवलं सद्मनि मागधीपतेः,
पथि व्यजृम्भन्त दिवौकसामपि ॥५॥
न संयतस्तस्य बभूव रक्षितु-
र्विसर्जयेद्यं सुतजन्महर्षितः ।
ऋणाभिधानात्स्वयमेव केवलं,
तदा पितॄणां मुमुचे स बन्धनात् ॥६॥
श्रुतस्य यायादयमन्तमर्भक-
स्तथा परेषां युधि चेति पार्थिवः ।

अवेक्ष्य धातोर्गमनार्थमर्थवि-
चकार नाम्ना रघुमात्मसम्भवम् ॥७॥
पितुः प्रयत्नात्स समग्रसम्पदः,
शुभैः शरीरावयवैर्दिने दिने ।
पुपोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमाः ॥८॥
उमावृषाङ्कौ शरजन्मना यथा,
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी,
ननन्दतुस्तत्सदृशेन तत्समौ ॥९॥
रथाङ्गनाम्नोरिव भावबन्धनं,
बभूव यत्प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत्तयोः,
परस्परस्योपरि पर्यचीयत ॥१०॥
उवाच धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चांगुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया,
पितुर्मुदं तेन ततान सोऽर्भकः ॥११॥

अथोपनीतं विधिवद् विपश्चितो
विनिन्युरेनं गुरवो गुरुप्रियम् ।
अबन्ध्ययत्नाश्च बभूवुरत्र ते,
क्रिया हि वस्तूपहिता प्रसीदति ॥१२॥

त्वचं स मेध्यां परिधाय रौरवी-
मशिक्षतास्त्रं पितुरेव मन्त्रवत् ।
न केवलं तद्गुरुरेकपार्थिवः,
क्षितावभूदेकधनुर्धरोऽपि सः ॥१३॥

अभ्यास

१. बालक का नाम रघु क्यों रखा गया ? कुमार के जन्म-श्रवण कराने वाले को राजा ने क्या-क्या दिया ? बालक के तेज का वर्णन करो। जन्म-श्रवण से राजा को कितना हर्ष हुआ ? बालक के जन्म होने पर राजदम्पति के प्रेम का वर्णन करो। बालक ने धनुर्विद्या किससे सीखी ?

२. सन्धिविच्छेद कीजिए—मरुतो ववुः। भवो हि। महोदधेः पूर इव। चेति, विभक्तमप्येकसुतेन। प्रथमोदिताम्। अभूच्च। सोऽर्भकः।

३. सविग्रह समासों के नाम लिखिए—प्रदक्षिणार्चिः। लोकाभ्युदयाय। हृतत्विषः। आलेख्यसमर्पिताः। कुमारजन्मामृत-सम्मिताक्षरम्। निवातपद्मस्तिमितेन। इन्दुदर्शनात्। समग्र-सम्पदः। बालचन्द्रमाः। तत्सदृशेन। तत्समौ। रथाङ्गनाम्नोः। तदीयाम्। अबन्ध्ययत्नाः।

उपमन्योरुपाख्यानम्

शब्दार्थ

प्रेषयामास=भेजा, अहनि=दिन में, दिवसक्षये=दिन समाप्त होने पर । पुरतः=सामने । प्रेक्ष्य=देखकर । पीवानम्=मोटा । दृढम्=मजबूत । भैक्ष्येण=भिक्षा-वृत्ति से । अनिवेद्य=निवेदन न करके । निशामुखे=दिन छिपते ही, न्याय्या=उचित । पयसा=दुग्ध के द्वारा । प्रतिज्ञाय=प्रतिज्ञा करके । नाश्नासि=नहीं खाता है । प्रत्यवादीत्=जवाब दिया । फेनम्=झाग । पिबतः=पीते हुए । उद्गिरन्ति=नीचे गिराते हैं । प्रभूततरम्=बहुत अधिक । प्रतिश्रुत्य=स्वीकार करके । अर्कपत्राणि=आक के पत्ते । चङ्क्रमाणः=घूमता हुआ, अन्वेष्यः=ढूँढना चाहिए । एहि=आओ । निशम्य=सुनकर । अशान=खाओ, प्रत्यचीकथत्=कहा ।

कश्चिदृषिरायोदधौम्यो नाम, तस्य शिष्यास्त्रयोऽभवन् उपमन्युरारुणिर्वेदश्चेति । तेषु प्रथममुपमन्युमुपाध्यायः प्रेषयामास—वत्स उपमन्यो ! गा रक्ष इति । स उपाध्यायवचनादरक्षद्गाः, स चाहनि गा रक्षित्वा दिवसक्षये गुरुगृहमागत्योपाध्यायस्य पुरतः स्थित्वा नमश्चक्रे । तमुपाध्यायः प्रेक्ष्य पीवानमुवाच—वत्स ! केन वृत्तिं कल्पयसि, पीवानसि दृढमिति । स उपाध्यायं प्रत्युवाच—भो, भैक्ष्येण वृत्तिं कल्पयामि

इति । तमुपाध्यायः प्रत्युवाच—मय्यनिवेद्य भैक्ष्यं नोपयोक्तव्यमिति । स तथेत्युक्त्वा भैक्ष्यं चरित्वा उपाध्यायाय न्यवेदयत् । स तस्मादुपाध्यायः सर्वमेव भैक्ष्यमगृह्णात् । स पुनररक्षद्गाः । अहनि रक्षित्वा निशामुखे गुरुकुलमागत्य गुरोरग्रतः स्थित्वा नमश्चक्रे । तमुपाध्यायस्तथापि पीवानमेव प्रेक्ष्योवाच—वत्स ! सर्वमशेषतस्ते भैक्ष्यं गृह्णामि, केनेदानीं वृत्तिं कल्पयसि ? इति । स एवमुक्तस्तमुवाच—भवते निवेद्य पूर्वमपरं चरामि तेन वृत्तिं कल्पयामीति । तमुपाध्यायः प्रत्युवाच—नैषा न्याय्या गुरुवृत्तिः । अन्येषाम्भैक्ष्योपजीविनां वृत्त्युपरोधं विदधासि एवं वर्तमानो लुब्धोऽसीति । स तथेत्युक्त्वा अरक्षत् । रक्षित्वा च पुनरुपाध्यायगृहमागम्य तस्य पुरः स्थित्वा नमश्चक्रे । उपाध्यायस्तथापि पीवानमेव दृष्ट्वा पुनरुवाच । अहं ते सर्वम्भैक्ष्यं गृह्णामि न चान्यच्चरसि पीवानसि भृशम्, केन वृत्तिं कल्पयसीति ? स एवमुक्तस्तम्प्रत्युवाच—भो एतासां गवां पयसा वृत्तिं कल्पयामीति । तमुवाचोपाध्यायः—नैतन्न्याय्यं पय उपयोक्तुं भवतः, मया नात्रानुज्ञातमिति । स तथेति प्रतिज्ञाय गा रक्षित्वा प्रदोषे पुनरुपाध्यायगृहमेत्य गुरोरग्रतः स्थित्वा नमश्चक्रे । तमुपाध्यायः पीवानमेवाव-

लोक्यावदत्—वत्स उपमन्यो ! भैक्ष्यं नाश्नासि, न चान्यच्चरसि, न पयः पिबसि, पीवानसि भृशं केनेदानीं वृत्तिं कल्पयसीति ? स एवमुक्तस्तं प्रत्यवादीत्—भो फेणं पिबामि, यमिमे वत्सा मातॄणां स्तनान् पिबन्त उद्गिरन्ति। स तम्प्रत्यवदत्—एते त्वदनुकंपया गुणवन्तो वत्साः प्रभूततरं फेणमुद्गिरन्ति, तदेषामपि वत्सानां वृत्त्युपरोधं विदधासि, एवं वर्तमानः फेणमपि त्वं न पातुमर्हसीति। स तथेति प्रतिश्रुत्य पुनरगच्छद्गाः, तथा प्रतिषिद्धो भैक्ष्यं नाश्नाति, न चान्यच्चरते, पयो न पिबति, फेणं नोपयुङ्क्ते। स कदाचिदरण्ये क्षुधार्तोऽर्कपत्राण्यभक्षयत्। स भक्षितैस्तैरर्कदलैः क्षारतिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव। ततस्सोऽन्धोपि चङ्क्रम्यमाणः कूपेऽपतत्। अथानागच्छति तस्मिन् रवावस्ताचलचूडावलम्बिनि शिष्यानुपाध्यायोऽवोचत् नागच्छदुपमन्युः। त ऊचुः—वनं गतो गा रक्षितुमिति। तानाह उपाध्यायः—मयोपमन्युः सर्वतः प्रतिषिद्धः स नियतं कुपितः ततो नागच्छति चिरम्, ततोऽन्वेष्य इत्येवमुक्त्वा शिष्यैः साकमरण्यं गत्वा तस्याह्वानाय शब्दं चकार—भो उपमन्यो ! क्वासि, वत्स ! एहीति। स उपाध्यायवचो निशम्य प्रत्युवाचोच्चैः—अयमस्मिन् कूपे

पतितोऽहमिति । तमुपाध्यायः प्रत्यवादीत्—कथमस्मिन् कूपे पतितस्त्वम् इति ? स तम्प्रत्यवदत्—अर्कपत्राणि भक्षयित्वान्धीभूतोस्मीत्यतः कूपे पतितः । स प्रत्यकथयत्तम्—अश्विनौ स्तुहि, तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्ताराविति । स एवमुक्त उपाध्यायेनोपमन्युः स्तोतुमुपचक्रमे देवावश्विनौ ऋग्भिर्वाग्भिः । तेनाभिष्टुतावश्विनौ आजग्मतुराहतुश्चैनं—प्रीतौ स्वः, एष तेऽपूपः, अशानैनमिति । स एवमुक्तः प्रत्यवदत्—नानृतमूचतुर्भगवन्तौ न त्वहमेनमपूपमुपयोक्तुमुत्सहे गुरवेऽनिवेद्येति । ततस्तावूचतुः । आवाभ्यां पुरस्ताद्भवतः उपाध्यायेनैवमेव अभिष्टुताभ्यामपूपो दत्तः, उपयुक्तः स तेनानिवेद्य गुरवे त्वमपि तथैव कुरुष्व यथा कृतमुपाध्यायेनेति । स एवमुक्तः पुनरेव प्रत्यचीकथत्—तौ एतत् प्रत्यनुनये भवन्तावश्विनौ, नोत्सहेऽहमनिवेद्य गुरवेऽपूपमेनमुपयोक्तुमिति । तमश्विनावाहतुः—प्रीतौ स्वस्तवानया गुरुभक्त्या, उपाध्यायस्य ते कार्ष्णायसा दन्ता भवतोपि हिरण्मया दन्ता भविष्यन्ति, चक्षुष्मांश्च भविष्यसि श्रेयश्चावाप्स्यसीति । स एवमुक्तोऽश्विभ्यां लब्धचक्षुरुपाध्यायसकाशमागम्य तमभ्यवादयत् आचचक्षे च, स चास्य प्रीतिमान् बभूव आह चैनं—यथाश्विनावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसि,

सर्वे ते वेदाः प्रतिभास्यन्ति सर्वाणि च धर्मशास्त्राणीति एषोपमन्योः परीक्षा ।

अभ्यास

१. गुरु ने उपमन्यु की परीक्षा किस प्रकार की ? गुरु ने दुबारा भिक्षा माँगने के लिए क्यों मना किया ? फेन पीने के लिए निषेध करने का क्या कारण है ? उपमन्यु अन्धा किस प्रकार हुआ ? पुनः उपमन्यु ने नेत्र-लाभ किस प्रकार किया ? उपमन्यु तथा अश्विनीकुमारों के वार्तालाप पर अपने विचार प्रकट कीजिए। इस कथा का सारांश अपनी भाषा में लिखिए।

२. सन्धिविच्छेद कीजिए—त्रयोभवन्, स उपाध्यायः, गा रक्ष, नमश्चक्रे, प्रत्युवाच, मय्यनिवेद्य, तथेत्युक्त्वा, गुरोरग्रतः, प्रेक्ष्योवाच, केनेदानीम्, नैषा, लुब्धोसीति, नचान्यच्चरसि, नैतन्न्याय्यम्, वृत्त्युपरोधम्, चक्षुष्युपहतोन्धो बभूव। त ऊचुः, इत्यादि।

३. वाच्य-परिवर्तन कीजिए—मयोपमन्युः सर्वतः प्रतिषिद्धः। तानाह उपाध्यायः।

४. इस पाठ में आये हुए समासयुक्त पदों का अन्वेषण कर के नाम लिखिए तथा विग्रह भी लिखिए।

५. निम्नलिखित पदों में प्रकृति-प्रत्यय पृथक्करण कीजिए—रक्षित्वा, आगत्य, प्रेक्ष्य, उपयोक्तव्यम्, भैक्ष्यम्, वृत्तिः, अभ्यनुज्ञातम्, गुणवन्तः, प्रतिश्रुत्य, चक्षुष्मन्तम्, उपयोक्तुम्।

रति-विलापः

शब्दार्थ

विबोधिता = होश में आई हुई। क्षितौ = पृथिवी पर। अनल = आग। विह्वल = बेहाल। वसुधा = पृथिवी। विकीर्णमूर्धजा = खुले हुए बालों वाली। प्रतिकूल = विरुद्धाचरण। अलिपंक्ति = भौंरों की कतार। वचनीयम् = निन्दा। अन्त्यमण्डनम् = अन्तिम (मरने के बाद) श्रृङ्गार। मधुः = वसन्त ऋतु। दिग्धशरैः = ज़हर में बुझे हुए बाण। विवृतद्वारम् = खुला हुआ दरवाज़ा। कपोतकर्बुरम् = कबूतर के रंग के समान। पर्युत्सुकः = देखना चाहने वाला। अनवस्थितम् = चंचल, अस्थिर। दशेव = बत्ती की तरह। परत्र = परलोक में।

अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ॥१॥

अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृति क्षितौ हरकोपानल-भस्म केवलम् ॥२॥

अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ॥३॥

क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः।
नलिनीं क्षतसेतुबन्धनो जलसंघात इवासि विद्रुतः ॥४॥

कृतवानसि विप्रियं न मे प्रतिकूलं न च ते मया कृतम् ।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते ॥५॥
हृदये वसतीति मत्प्रियं यदवोचस्तदवैमि कैतवम् ।
उपचारपदं न चेदिदं त्वमनंगः कथमक्षता रतिः ॥६॥
परलोक-नव-प्रवासिनः प्रतिपत्स्ये पदवीमहं तव ।
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ॥७॥
नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना ॥८॥
अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः ।
बहुलेपि गते निशाकरस्तनुतां दुःखमनंग मोक्ष्यति ॥९॥
अलिपंक्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता ।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम् ॥१०॥
प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः ।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्ग-पण्डिताम् ॥११॥
रचितं रति-पण्डित त्वया स्वयमङ्गेषु ममेदमार्तवम् ।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥१२॥
अहमेत्य पतंगवर्त्मना पुनरंकाश्रयणी भवामि ते ।
चतुरैः सुरकामिनीजनैः प्रिय यावन्न विलोभ्यसे दिवि ॥१३॥

मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं रमण त्वामनुयामि यद्यपि ॥१४॥
क्रियतां कथमन्त्यमंडनं परलोकान्तरितस्य ते मया ।
सममेव गतोस्य तर्कितां गतिमङ्गेन च जीवितेन च ॥१५॥
क्व नु ते हृदयंगमः सखा कुसुमायोजितकार्मुको मधुः ।
न खलूग्ररुषा पिनाकिना गमितः सोपि सुहृद्-
गतां गतिम् ॥१६॥
अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवाहतः ।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत् पुरः ॥१७॥
तमवेक्ष्य रुरोद सा भृशं स्तनसंबाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥१८॥
इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त
किं स्थितम् ।
तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम् ॥१९॥
अयि संप्रति देहि दर्शनं स्मर पर्युत्सुक एष माधवः ।
दयितास्वनवस्थितं नृणां न खलु प्रेमचलं सुहृज्जने ॥२०॥
गत एवं न ते निवर्तते स सखा दीप इवानिलाहतः ।
अहमस्य दशेव पश्य मामविषह्य व्यसनेन धूमिताम् ॥२१॥

तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम् ॥२२॥
शशिना सह याति कौमुदी सह मेघेन तडित् प्रलीयते ।
प्रमदा पतिवर्त्म गाहति प्रतिपन्नं हि विचेतनैरपि ॥२३॥
कुसुमास्तरणे सहायतां बहुशः सौम्य गतस्त्वमावयोः ।
कुरु संप्रति तावदाशु मे प्रणिपातांजलियाचितश्चिताम् ॥२४॥
तदनु ज्वलनं मदर्पितं त्वरये दक्षिणवातवीजनैः ।
विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना ॥२५॥
इति चापि विधाय दीयतां सलिलस्यांजलिरेक एव नौ ।
अविभज्य परत्र तं मया सहितः पास्यति ते स बान्धवः ॥२६॥
इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती ।
शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकम्पयत् ॥२७॥
परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः ।
उपलब्धसुखस्तदा स्मरं वपुषा स्वेन नियोजयिष्यति ॥२८॥
तदिदं परिरक्ष शोभने भवितव्यप्रियसंगमं वपुः ।
रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी ॥२९॥

अभ्यास

१. रति-विलाप का सारांश अपनी भाषा में लिखो। उदाहरण द्वारा सिद्ध करो कि परिचय वाले मनुष्य के आ जाने पर दुःख

बढ़ जाता है। वसन्त के आने पर रति ने क्या कहा ? रति को आकाशवाणी ने किस प्रकार सान्त्वना दी ?

२. सन्धि-विच्छेद कीजिए—जीवसीत्यभिधाय । पुनरेव । तदवैमि । निष्फलोदयः । मधुरालापः । कणशो विकीर्यते इत्यादि।

३. समासों के नाम लिखते हुए विग्रह दिखलाइए—

नववैधव्यम् , वसुधालिंगनधूसरस्तनीम् । त्वदधीनजीविताम्। परलोकनवप्रवासिनः । निष्फलोदयः । मधुरालापनिसर्गपण्डिताम्। विवृतद्वारम् । दक्षिणवातवीजनैः, इत्यादि ।

४. 'मदनेन' में तृतीया क्यों ? 'पवनैः' में तृतीया क्यों ? (श्लो० १६)।

कन्या-परीक्षा

शब्दार्थ

अनेककोटिसारः=करोड़ों रुपये वाला । अदाराणाम्=स्त्री रहितों को। कलत्रम् = स्त्री । परप्रत्यय = दूसरों का विश्वास । वस्त्रान्तपिनद्धशालिप्रस्थ = कपड़े के पल्ले में चावल बांधकर । विरलभूषणाम् = कुछ भूषण धारण किये हुए । अविमृश्यकारिणाम् = विचार न करने वाले । संक्षुद्य = कूटकर । भूषणमृजा = गहने साफ़ करना । स्वर्णकारः = सुनार । काकिणीभिः = कौड़ियों से । आहर = ला । समभ्युक्ष्य = बुझाकर । कृष्णांगारीकृत्य = कोयले बनाकर । चिञ्चाफलम् = इमली । उपयम्य = विवाह करके ।

अस्ति द्रविडेषु काञ्ची नाम्नी नगरी । तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत् । सोष्टादशवर्षदेशीयश्चिन्तामापेदे—नास्त्यदाराणामननुगुणदाराणां वा सुखं नाम । तत्कथन्नु गुणवद् विन्देयं कलत्रमिति । अथ परप्रत्ययाहृतेषु दारेषु यादृच्छिकीं संपत्तिमनभिसमीक्ष्य कार्तान्तिको नाम भूत्वा वस्त्रान्तपिनद्धशालिप्रस्थो भुवं बभ्राम । 'लक्षणज्ञोऽयम्' इत्यमुष्मै कन्या प्रदर्शयाम्बभूवुः । यां काञ्चिल्लक्षणवतीं सवर्णां कन्यां दृष्ट्वा

स किल स्म ब्रवीति—भद्रे ! शक्नोषि किमनेन शालिप्रस्थेन गुणवन्तमस्मानभ्यवहारयितुम् इति स हसितो वधूतो गृहाद् गृहं प्रविश्याभ्रमत् ।

एकदा तु शिविषु कावेरीदक्षिणतीरेषु पट्टने सह पितृभ्यामवसितमहर्धिमवशीर्णभवनसारां धात्र्या प्रदर्श्यमानां काञ्चन-विरलभूषणां कुमारीं ददर्श । अस्यां संसक्तचक्षुश्चातर्कयत्—'अस्याः खलु कन्यकायाः सर्व एवावयवा नातिस्थूला नातिकृशा नातिह्रस्वा नातिदीर्घा न विकटा मृजावन्तश्च । सेयमाकृतिर्न व्यभिचरति शीलम् । आसज्जति च मे हृदयमस्यामेव । तत् परीक्ष्यैनामुद्वहेयम् । अविमृश्यकारिणां हि नियतमनेकाः पतन्त्यनुशयपरम्पराः' इति स्निग्धदृष्टिराचष्ट—'भद्रे, कच्चिदस्ति कौशलं शालिप्रस्थेनानेन सम्पन्नमाहारमस्मानभ्यवहारयितुम्' इति । ततस्तया वृद्धदासी साकूतमालोकिता । तस्य हस्तात् प्रस्थमात्रं धान्यमादाय क्वचिदलिन्दोद्देशे सुसिक्तसंमृष्टे दत्तपादशौचमुपावेशयत् ।

सा कन्या तान् गन्धशालीन् संक्षुद्य तुषैरखण्डैस्तण्डुलान् पृथक् चकार । जगाद च धात्रीम्—'एभिस्तुषैरर्थिनो भूषणमृजा क्रियाक्षमैः स्वर्णकाराः । तेभ्य इमान्

दत्त्वा लब्धाभिः काकिणीभिः स्थिरतराण्यनत्यार्द्राणि नातिशुष्काणि काष्ठानि मितम्पचां स्थालीमुभे शरावे चाहर' इति । तथा कृते तयौदनं निष्पाद्येन्धनान्यन्तःसाराण्यम्भसा समभ्युक्ष्य प्रशमिताग्नीनि कृष्णाङ्गारीकृत्य तदर्थिभ्यः प्राहिणोत् 'एभिर्लब्धाः काकिणीर्दत्त्वा शाकं घृतं दधि तैलं चिञ्चाफलं च यथालाभमानय' इति । तथानुष्ठिते च तया द्वित्रानुपदंशानुपपाद्य धातृमुखेनाहाराय तमनोदयत् । सशेष एवान्धस्यसावतृप्यत् ।

परितुष्टश्च विधिवदुपयम्य कन्यां निन्ये ।

अभ्यास

१. कन्या में कौन-से गुण होने चाहिएँ ? कन्या की परीक्षा शक्तिकुमार ने किस प्रकार की ? कन्या ने केवल थोड़े से चावलों से भोजन की समस्त सामग्री किस प्रकार एकत्रित की ?

२. अननुगुणद्वाराणाम् , परप्रत्ययाहृतेषु अवशीर्ण-भवनसाराम् , विरलभूषणाम् , भूषणमृजा, क्रियाक्षमैः—इनका विग्रह लिखिए ।

प्रश्नोत्तरी

शब्दार्थ

श्रुतेन = वेदाध्ययन से। इन्द्रियार्थान् = इन्द्रियों के विषयों को। उच्छ्वसन् = श्वास लेता हुआ। निर्वपति = देता है। खात् = आकाश से। प्रवसतः = परदेस गये हुए का। आतुरस्य = रोगी का। तुष्टि = सन्तोष। अराजकम् = जिसका राजा न हो। अनन्तकः = मृत्यु न करने वाला। पुमान् = मनुष्य। मत्सरः = ईर्ष्या। हृत्तापः = हृदय की जलन। वृत्तम् = आचार। अक्षीणवृत्तः = (अक्षीणं वृत्तं यस्य, सः—बहु०) सुरक्षित आचार वाला। वृत्ततस्तु हतो हतः = आचार-भ्रष्ट मरा ही होता है। क्रियावान् = अनुष्ठान (अमल) करने वाला। दान्तः = जितेन्द्रिय। यमालयम् = मृत्यु को। स्थावरम् = अमरता को। अप्रतिष्ठः = (नास्ति प्रतिष्ठा यस्य, सः—बहु०) जिसकी कोई नींव (जड़) नहीं।

प्रश्नः—केनस्विच्छ्रोत्रियो भवति केनस्विद् विन्दते महत्।
केनस्विद् द्वितीयवान् भवति राजन्, केन च बुद्धिमान् ॥१॥

उत्तरम्—श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत्।
धृत्या द्वितीयवान् भवति बुद्धिमान् वृद्धसेवया ॥२॥

प्र०—इन्द्रियार्थाननुभवन् बुद्धिमांल्लोकपूजितः।
संमतः सर्वभूतानां उच्छ्वसन् को न जीवति ॥३॥

उ०—देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ।
न निर्वपति पञ्चानाम् उच्छ्वसन् न स जीवति ॥४॥

प्र०—किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं न खात् ।
किंस्विच्छीघ्रतरं वायोः किंस्विद् बहुतरं तृणात् ॥५॥

उ०—माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा ।
मनः शीघ्रतरं वाताच् चिन्ता बहुतरी तृणात् ॥६॥

प्र०—किंस्वित् प्रवसतो मित्रं किंस्विन् मित्रं गृहे सतः ।
आतुरस्य च किं मित्रं किंस्विन् मित्रं मरिष्यतः ॥७॥

उ०—विद्या प्रवसतो मित्रं भार्या मित्रं गृहे सतः ।
आतुरस्य भिषङ् मित्रं दानं मित्रं मरिष्यतः ॥८॥

प्र०—धन्यानाम् उत्तमं किंस्विद् धनानां स्यात् किमुत्तमम् ।
लाभानाम् उत्तमं किं स्यात् सुखानां स्यात् किमुत्तमम् ॥९॥

उ०—धन्यानाम् उत्तमं दाक्ष्यं धनानाम् उत्तमं श्रुतम् ।
लाभानां श्रेय आरोग्यं सुखानां तुष्टिरुत्तमा ॥१०॥

प्र०—मृतः कथं स्यात् पुरुषः कथं राष्ट्रं मृतं भवेत् ।
श्राद्धं मृतं कथं वा स्यात् कथं यज्ञो मृतो भवेत् ॥११॥

उ०—मृतो दरिद्रः पुरुषो मृतं राष्ट्रमराजकम् ।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः ॥१२॥

प्र०—कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः ।
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः ॥१३॥

उ०—क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः ।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ॥१४॥

प्र०—कः पण्डितः पुमान् ज्ञेयो नास्तिकः कश्च उच्यते ।
को मूर्खः कश्च कामः स्यात् को मत्सर इति स्मृतः ॥१५॥

उ०—धर्मज्ञः पण्डितो ज्ञेयः नास्तिको मूर्ख उच्यते ।
कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ॥१६॥

प्र०—राजन्, कुलेन वृत्तेन स्वाध्यायेन श्रुतेन वा ।
ब्राह्मण्यं केन भवति प्रब्रूह्येतत् सुनिश्चितम् ॥१७॥

उ०—शृणु यक्ष, कुलं तात न स्वाध्यायो न च श्रुतम् ।
कारणं हि द्विजत्वे स्याद् वृत्तमेव न संशयः ॥१८॥
वृत्तं यत्नेन संरक्ष्यं ब्राह्मणेन विशेषतः ।
अक्षीणवृत्तो न क्षीणो वृत्ततस्तु हतो हतः ॥१९॥
पठकाः पाठकाश्चैव ये चान्ये शास्त्रनिन्दकाः ।
सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥२०॥
चतुर्वेदोऽपि दुर्वृत्तः स शूद्रादतिरिच्यते ।
योऽग्निहोत्रपरो दान्तः स ब्राह्मण इति स्मृतः ॥२१॥

प्र०—का च वार्ता किमाश्चर्यं कः पन्थाः कश्च मोदते ।
ब्रूहि मे चतुरः प्रश्नान्मृता जीवन्तु बान्धवाः ॥२२॥

उ०–अस्मिन् महामोहमये कटाहे,
सूर्याग्निना रात्रिदिवेन्धनेन ।
मासर्तुदर्वी - परिघट्टनेन,
भूतानि कालः पचतीति वार्ता ॥२३॥

अहन्यहनि भूतानि गच्छन्ति यम-मन्दिरम् ।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्यमतः परम् ॥२४॥

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः,
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां,
महाजनो येन गतः स पन्थाः ॥२५॥

पञ्चमेऽहनि षष्ठे वा शाकं पचति वै गृहे ।
अनृणी चाप्रवासी च स वारिचर ! मोदते ॥२६॥

अभ्यास

१. संसार में जीवित भी वास्तव में कौन जीवित नहीं है ?

२. भूमि से भी गुरु कौन है ? विदेश में मित्र कौन है ? घर में मित्र कौन है ?

३. मनुष्य का ऐसा कौन शत्रु है जो दुर्जय है ? वास्तविक ब्राह्मणत्व किसमें है ? वास्तविक प्रसन्नता किसे कहते हैं ? संसार में आश्चर्यमयी बात क्या है ?

४. मृतमश्रोत्रियं श्राद्धम्—इसका आशय बताओ ।

५. उच्चतरः, उत्तमम्, गुरुतरा—ये किस प्रकार के विशेषण हैं ? इनका प्रयोग अपने वाक्यों में करो। इस पाठ में से ऐसे कुछ और रूप बताओ।

६. प्रवसतः, श्रेयः, उच्छ्वसन्—इनके शब्द, विभक्ति और वचन बताओ।

७. इनमें सन्धिच्छेद करो—

बुद्धिमाँल्लोकपूजितः, पितोच्चतरस्तथा।

८. वृत्ततस्तु हतो हतः। यः क्रियावान् स पण्डितः। महाजनो येन गतः स पन्थाः।—इनकी व्याख्या करो।

९. सर्वभूतहितः, निर्दयः, अक्षीणवृत्तः, अप्रतिष्ठः—इनका विग्रह करो और समासों के नाम बताओ।

१०. ज्ञेयः, स्मृतः निहितम्—इनके प्रकृति प्रत्यय बताकर इन का ही प्रयोग अपने वाक्यों में करो।

११. इनमें सन्धिच्छेद करो—

ब्रूयेतत्, पाठकाश्च, चाप्रवासी।

भारत-गौरवम्

शब्दार्थ

पुण्यमयम्=पुण्यों से भरा हुआ। अवतार=प्रकट होना। अशिक्षन्त=सीखते थे। प्रभवति=पैदा होता है। पूयते=पवित्र किया जाता है। विद्यते=होता है। अद्यतन=आजकल का। गौरवम्=महत्व। चञ्चच्चन्द्रहासैः=चमकती हुई तलवारों से। परिपन्थी=शत्रु। शोणित=रक्त। स्वप्रतिकूल=अपने से विरुद्ध। व्यासक्तशूलैः=कार्य में लगे हुए हैं शूल जिनके। शतघ्नी=तोप। प्रत्यर्थी=वैरी। शुण्डी=हाथी। दोर्दण्ड=भुजा। अर्यवर्य=श्रेष्ठ वैश्य। काञ्चन=सुवर्ण। महार्ह=अमूल्य। बड़ी कीमत वाली। जाम्बूनद=सोना। गवाक्षजाल=झरोखा। विश्वकर्मरचिता इव=मानो विश्वकर्मा ने ही बनाये हों। सादी=घुड़सवार। कशा=चाबुक। सप्तिसमूह=घोड़ों का समूह। कर्दम=कीचड़। सर्वकृच्छ्राः=समस्त कष्ट। विदेहवत्=जनक जी की तरह। परःसहस्राः=हज़ारों। विमलाः=कलंक रहित। विशारदा=चतुर। अनसूया=ईर्ष्या रहित। यशोदा=यश दिलाने वाली। पतङ्गताम्=पतङ्ग नामक कीट के समान। स्तनंधयः=दूध पीता हुआ बच्चा।

भारतं पुण्यमयः देश इतीतिहासेषु लिखितमस्ति, पुरा पाश्चात्याः (इङ्गलैंडीयाः) जना अत्रागत्य शिल्पकलाः कौशलं चाशिक्षन्त, श्रीरामादीनामवतारोऽपि

अस्मिन्नेव देशेऽभूत् । अत्रैव जातेन श्रीजिनमहाराजेन ज्ञानामृतेन जनानाम् अज्ञानं दूरीकृतम् । गान्धीपदाभिख्यातस्य महात्मनः श्रीमोहनदासस्य जन्मनापि एषैव पुण्यभूमिरलङ्कृता । गङ्गासिन्धुसरस्वतीनां पवित्रैः प्रवाहैः भारतमेव पूयते, यासु स्नानेन यासां जलपानेन च भारतीयानां पुनर्जन्म न विद्यते । एभिः कारणैः अत्र देशे महता पुण्येन जन्म लभ्यते अत एव भारतीया बाला धीमन्तः सच्चरित्राः प्रख्याताश्च सन्ति । स्त्रीणामुच्चपदं मन्यन्ते । भारतीयाः स्त्रियः पातिव्रत्येन विशेषतः प्रसिद्धाः । सीता-शकुन्तलादीनां नामस्मरणेन तासां कथाश्रवणेन च अस्मासु तेजो बलं च प्रभवति । अतः भारतस्य गौरवं भूतले प्रख्यातमस्ति ।

तत्र भव्यभारते विराजते कश्चन धैर्यधारि-धुरन्धरैर्धर्मोद्धारधौरेयैः सोत्साहसाहसचञ्चच्चन्द्रहासैः सद्यश्छन्नपरिपन्थि - गलगलच्छोणितच्छुरितच्छन्नच्छुरिकैः भयोद्भेदन-भिन्दिपालैः स्वप्रतिकूल-कुलोन्मूलनानुकूल-व्यापार-व्यासक्तशूलैः घनविघ्न-विघट्टक-घर्घराघोष-घोर-शतघ्नीकैः प्रत्यर्थि-शुण्डि-शुण्डा-खण्डनोद्दण्डभुशुण्डीकैः प्रचण्ड-दोर्दण्ड-वैदग्ध्य-भाण्ड-प्रकाण्डकाण्डैः क्षत्रियवर्यैरार्य-

वर्यैरर्यवर्यैश्च व्याप्तो राजपुत्र-प्रदेशः। यत्र च कोषपूरिताः काञ्चनमया इव सानुमन्तः महार्हमणिगणजटित-जाम्बूनद-भूषणभूषिता गन्धर्वा इव जाताः, विचित्रगवाक्षजाला-ट्टालिकाङ्गणकपोतपालिकाः चत्वरगोष्ठभित्तिका विश्वकर्म-रचिता इव गृहाः सादिकरस्थकशा-प्रचालन-संकेत-सञ्चलित-सप्तिसमूहशफसम्मर्द-समुद्धूत-धूलिधूसरिताश्च मार्गाः। यत्रत्याः क्षत्रियकुलतिलकाः केचन यवनराज-वशंवदता-कर्दम-सम्मर्दनेन न कदाप्यात्मानं कलङ्कयामासुः। केचन स्वदेश-सम्मान-संरक्षण-तुच्छीकृत-सर्वकृच्छ्राः, केचन धर्माय समर्पितसर्वस्वाः, केचन कलावपि विदेहवदवाप्तराजर्षिपद-वीकाः राजानो बभूवुः। यत्रत्याः परःसहस्राः क्षत्रियकुला-ङ्गनाः कमला इव विमलाः, शारदा इव विशारदाः, अनसूया इव अनसूयाः, यशोदा इव यशोदाः, सत्य इव सत्यः, सुवर्णा इव सुवर्णाः, सम्भाव्यमान-यवनबलात्कारधिक्कारोर्ज्जस्वलते-जस्का योगाग्निनेव पतिविरहवह्निनेव, स्वक्रोधानलेनेव सन्दी-पितासु ज्वालाजालाञ्चितासु चितासु स्मारं स्मारं स्वपतीन् पश्यतामेव स्वकीयानां परकीयानाञ्च क्षणात् पतङ्गता-मङ्गीकृत्य श्रीगङ्गाधरस्याङ्गभूषणतामगमन्। यत्रत्या दास्यः स्वस्वामिकुलाङ्कुरसंरक्षणाय संवर्द्धनाय वा मौनमन-

श्रुपातं निजं स्तनंधयमपि दस्युदावानलार्पयन्त्यः, अन्तर्दग्धा अपि नित्यहरिता दरीदृश्यन्ते। सोऽयं प्रदेश एव राजस्थानमिति नाम्ना साम्प्रतं विराजते।

अभ्यास

१. भारत देश कैसा है ?

२. सन्धिच्छेद करो—अतएव। सच्चरित्राः। तेजोबलम्। जन्मनापि। अस्मिन्नेव।

३. नीचे लिखे रूपों के शब्द, विभक्ति, वचन लिखो—

तेजः। गौरवम्। महात्मनः। जनानाम्। स्त्रियः।

४. स्त्रियों का भारत में क्या स्थान है ?

भारत-गीतिका

शब्दार्थ

भारतीयाः = भारत-निवासियो (सम्बो०)। अलम् = बन्द करो। (अलम् के योग में तृतीया आती है।) शाश्वतः = सदास्थायी। धरायाम् = पृथ्वी पर। चतुर्वर्ग = धर्म, अर्थ, काम, मोक्ष। धर्मतत्त्वम् = धर्म का सार। समुद्भासितः = उत्पन्न किया हुआ है। आलम्ब्य = आश्रय लेकर। चन्द्रशुभ्रम् = चाँद के समान निर्मल। तनुध्वम् = फैलाओ।

(१)

अलं भारतीया मतानां विभेदै-
रलं देशभेदेन वैरेण चालम्।
अयं शाश्वतो धर्म एको धरायां
न संभाव्यते धर्मतत्त्वेषु भेदः॥

(२)

दया भूतसंघे मतिर्देवदेवे,
चतुर्वर्ग-चिन्ता, विरोधाद् विरामः।
सदा काय-वाक्-शोधने चैव बुद्धिः
परं धर्मतत्त्वं विरोधोऽत्र केषाम्॥

(३)

नराः सर्व एवैकमीशं भजन्ते,
स ईशः परं नामभेदेन भिन्नः ।
समुद्भासितो धर्म एतेन चैको
विचिन्त्येति को वर्ततां भेदवादे ॥

(४)

कलिङ्गाङ्ग-वङ्गान्ध्रक-द्राविडादी-
नुपाधीन् विहायैक्यमालम्ब्य भूयः ।
अये भारतीयाः ! पुरेवात्मरूपं
लभध्वं यशश्चन्द्रशुभ्रं तनुध्वम् ॥

अभ्यास

१. इस गीतिका में किस बात को दर्शाया गया है ?

२. कलिङ्ग, अङ्ग, वङ्ग, अन्ध्रक, द्राविड़ को आजकल क्या कहते हैं ?

३. अलम् के योग में कौन विभक्ति होती है ?—अपने वाक्यों में इसका प्रयोग करो ।

४. इनमें सन्धि करो—

विरोधात् + विरामः, विरोधः + अत्र, विचिन्त्य + इति, यशः + चन्द्रशुभ्रम् ।

जठरनिरूपणम्

शब्दार्थ

जठर = पेट । सर्पति = सरकता है । निम्नगा = नदी । जठर-हुताशः = पेट की आग । परस्वम् = दूसरे का धन । शरीरकान्तारे = शरीर रूपी वन में । लुनीते = अन्न काटता है । शिखी = अग्नि । मतिः = बुद्धि । दष्टानाम् = डसे हुए । परवेश्मसु = दूसरों के घरों में । चाटुशतानि = सैंकड़ों तरह की खुशामद । लङ्घति = लाँघता है । हुतभुजि = अग्नि में । शमित्वा = शान्त करके । आस्पदम् = स्थान ।

तावज्जल्पति सर्पति तिष्ठति माद्यति विलसति च विभाति ।
यावन्नरो न जठरं देहभृतां जायते रिक्तम् ॥१॥
यद्यकरिष्यद्धातो निक्षिप्तद्रव्यनिर्गमद्वारम् ।
को वा शक्यः कर्तुं जठरघटीपूरणं मर्त्यः ॥२॥
शक्येतापि समुद्रः पूरयितुं निम्नगाशतसहस्रैः ।
नो शक्यते कदाचिज्जठरसमुद्रोऽन्नसलिलेन ॥३॥
वैश्वानरो न तृप्यति नानाविधकाष्ठनिचयतो यद्वत् ।
तद्वज्जठरहुताशो नो तृप्यति सर्वथाप्यशनैः ॥४॥
यस्यां वस्तु समस्तं न्यस्तं नाशाय कल्पते सततम् ।
दुष्पूरोदरपिठरीं कस्तां शक्नोति पूरयितुम् ॥५॥

तावन्नरः कुलीनो मानी शूरः प्रजायतेऽत्यर्थम् ।
यावज्जठरपिशाचो वितनोति न पीडनं देहे ॥६॥
यदि भवति जठरपिठरी नो मानविनाशिका शरीरभृताम् ।
कः कस्य तदा दीनं जल्पति मानापहारेण ॥७॥
गायति नृत्यति वल्गति धावति पुरतो नृपस्य वेगेन ।
किं किं न करोति पुमानुदरगृहपवनवशीभूतः ॥८॥
जीवान्निहन्त्यसत्यं जल्पति बहुधा परस्वमपहरति ।
यदकृत्यं तदपि जनो जठरानलतापितस्तनुते ॥९॥
द्युतिगतिमतिरतिलक्ष्मीलता लसन्ति तनुधारिणां तावत् ।
यावज्जठरदवाग्निर्न ज्वलति शरीरकान्तारे ॥१०॥
संसारतरणदक्षो विषयविरक्तो जरार्दितोऽप्यसुमान् ।
गर्वोद्ग्रीवं पश्यति सधनमुखं जठरनृपगदितः ॥११॥
कर्षति वपति लुनीते दीव्यति सीव्यति पुनाति वयते च ।
विदधाति किं न कृत्यं जठरानलशान्तये तनुमान् ॥१२॥
लज्जामपहन्ति नृणां मानं नाशयति दैन्यमुपचिनुते ।
वर्धयति दुःखमखिलं जठरशिखी वर्धितो देहे ॥१३॥
गुणकमलशशाङ्कतनुर्गर्वग्रहनाशने महामन्त्रः ।
मुखकुमुदौघदिनेशो जठरशिखी बाधते किं न ॥१४॥

शिथिलीभवति शरीरं दृष्टिर्भ्राम्यति विनाशमेति मतिः ।
मूर्च्छा भवति जनानामुदरभुजङ्गेन दष्टानाम् ॥१५॥
उत्तमकुलेऽपि जातः सेवां विदधाति नीचलोकस्य ।
वदति च वाचां नीचामुदरेश्वरपीडितो मर्त्यः ॥१६॥
दासीभूय मनुष्यः परवेश्मसु नीचकर्म विदधाति ।
चाटुशतानि च कुरुते जठरदरीपूरणाकुलितः ॥१७॥
क्रीणाति खलति याचति गणयति रचयति विचित्रशिल्पानि ।
जठरपिठरीं न शक्तः पूरयितुं गतशुभस्तदपि ॥१८॥
प्रविशति वारिधिमध्यं संग्रामभुवं च गाहते विषमाम् ।
लंघति सकलधरित्रीमुदरग्रहपीडितः प्राणी ॥१९॥
कर्माणि यानि लोके दुःखनिमित्तानि लज्जनीयानि ।
सर्वाणि तानि कुरुते जठरनरेन्द्रस्य वशमितो जन्तुः ॥२०॥
अर्थः कामो धर्मो मोक्षः सर्वे भवन्ति पुरुषस्य ।
तावद्यावत्पीडां जाठरवह्निर्न विदधाति ॥२१॥
एवं सर्वजनानां दुःखकरं जठरशिखिनमतिविषमम् ।
संतोषजलैरमलैः शमयन्ति यतीश्वरा ये ते ॥२२॥
ज्वलितेऽपि जठरहुतभुजि कृतकारितमोदितैर्न वाहारैः ।
कुर्वन्ति जठरपूर्तिं मुनिवृषभा ये नमस्तेभ्यः ॥२३॥

तावत्कुरुते पापं जाठरवह्निर्न शाम्यते यावत् ।
धृतिवारिणा शमित्वा तं यतयः पापतो विरताः ॥२४॥
श्रीमदमितगतिसौख्यं परमं परिहरति मानमपहन्ति ।
विरमति वृषतस्तनुमानुदरदरीपूरणासक्तः ॥२५॥
शुभपरितोषवारिपरिषेकबलेन यतिः सुदुःसहं
शमयति यः कृतान्तसमचेष्टितमुत्थितमौदरानलम् ।
व्रजति स रोगशोकमदमत्सरदुःखवियोगवर्जितं
विगलितमृत्युजन्ममपविघ्नमनर्घमनन्तमास्पदम् ॥२६॥

अभ्यास

१. पेट के लिए मनुष्य क्या-क्या करता है ? जठराग्नि को मुनि लोग किस प्रकार शान्त करते हैं ? २१ वें श्लोक का भावार्थ क्या है ?

२. प्रविशति, वितनोति, विदधाति, अपहन्ति—इनके लङ् लकार में रूप लिखिए।

३. प्राणी, दवाग्नि, दृष्टि, वारि—इनके तृतीया, चतुर्थी में रूप लिखिए।

ध्रुवोपाख्यानम्

शब्दार्थ

उपदिष्टेन = बताये हुए। अभीष्टात् = मनोरथ से। त्रिकाल = तीनों समय (प्रातः, मध्याह्न और सायम्)। शयानं = सोते हुए। शुचः = शोक करना। मृगयायां = शिकार खेलने में। दावाग्निं = बन की आग। अन्तर्दधे = अन्तर्धान हो गया। प्राणमत् = नमस्कार किया।

पुरा उत्तानपादस्य राज्ञः सुनीतिः सुरुचिश्च द्वे भार्ये आस्ताम्। यथा सुरुचिः पत्युः प्रिया, न तथाऽन्या। एकदा ध्रुवः सुरुचेः पुत्रमुत्तमं पितुरङ्कमारूढमवलोक्य स्वयमपि तथैवैच्छत्। तदा सुरुचिस्तस्याभीष्टमवगम्य सेर्ष्यं राज्ञि शृण्वति जगाद—"हे वत्स! नृपतेरङ्कासीनमात्मानमिच्छसि चेत् तर्हि मत्तो जन्म गृहाण"। दुर्भाषणबाणविद्धः ध्रुवो रुदन् स्वमातुरन्तिकं गत्वा तत् सर्वमकथयत्। सुनीतिरपि सपत्न्या दुर्वचनं सुतमुखात् समाकर्ण्य धीरा वीरा च सुतमाश्वासयत्—"हे बाल! यः कश्चिदपरं पीडयति स कालान्तरे स्वयमेव तद्दुःखं भुङ्क्ते, यः परेभ्यः कूपं खनति स तस्मिन् कूपे स्वयं पतति। त्वं भाग्यहीनाया मत्तो जातोऽसि। अतः सुरुच्या यदुक्तं तत् सत्यम्। त्वं

यदि राज्यसिंहासनमिच्छसि तर्हि सत्यं शिवं मङ्गलं भगवन्तमाराधय, हे वत्स ! हरेराराधनं विनाऽन्यः कश्चिद् दुःखच्छित् सुकरो मार्गस्ते नास्ति ।"

मातुर्वचः प्रेरितो ध्रुवः सांसारिकसुखं विहाय भागीरथी-तटे तपस्तेपे । तदानीं महर्षिर्नारदः पर्यटन् तत्रैवाजगाम । स च ध्रुवचिकीर्षितं ज्ञात्वा प्राह—"अहो ! क्षत्रियाणां प्रभावः, इदमेव कुलीनत्वम् । बालोऽप्येष मातुर्दुर्वचांसि हृदि कष्टं धारयति" इत्यभिधाय प्रणमन्तं पाणिना मूर्ध्नि स्पृष्ट्वोवाच—"हे राजपुत्र ! पुरुषं सुखं दुःखं वा निज-कर्मभिरेव भवति, दैवाद् यत् प्राप्तं तेनैव सन्तोषो विधेयः पुरुषेण । मात्रोपदिष्टेन येनोपायेन त्वं देवं प्रसादयितु-मिच्छसि तन्न साधु इति मम मतम् । अतोऽस्माद् व्यापा-राद् विरम् । निष्फलोऽयं तवाग्रहः । सुखं दुःखं च दैवानु-रूपं लभ्यत इति चिन्तयन् देही मोक्षं लभते । शास्त्रसारो-ऽयम्—गुणैरधिकं दृष्ट्वा प्रीतो भवेत्, नेर्ष्यालुः । गुणै-र्हीनं दृष्ट्वा कृपालुर्भवेत्, न तिरस्कर्ता । गुणैः समं दृष्ट्वा मैत्रीं कुर्यात्, न च स्पर्धाम् । एवं कृते सति पुरुषः दुःखं नाप्नोति ।"

एवमुक्तवति नारदे ध्रुवः ध्रुव इव अचलो निजाभीष्टाद् रेखामात्रमपि न व्यचलत्। तेन प्रतिभाषितम्—"दुर्वचन-बाणविद्धं मे हृदयं कथमपि न शाम्यति, भगवन्! भवान् लोकानां हिताय परोपकाराय च भूतले सूर्यवत् पर्यटति, अतो मामुपदिश, येन मे श्रेयो भवेत्।" श्रीनारदः कथयति—"हे बाल! तव जनन्या यो मार्गः प्रदर्शितः स एव श्रेयान्, शृणु हरिचरणसेवनमेव परमोत्तमं साधनमस्ति। भागीरथीजले त्रिकालं स्नाहि, यमनियमान् पालय, प्राणायामेन मनोमलं जहिहि, एवं कृते प्रसादसुमुखं चतुर्भुजं पीताम्बरं नयनानन्दकरं हरिं दिव्यचक्षुषा द्रक्ष्यसि। निजाभीष्टं प्राप्स्यसि च।" ततः प्रभृति श्रीनारदप्रोक्तं कृत्यमनुतिष्ठन् स भागीरथीतटे कालमयापयत्। महर्षिरपि भूतले विचरन् पुत्रशोकातुरं राजानमुपेत्य जगाद—"राजन्! त्वया साधु न कृतं यत् पञ्चवर्षीयो बालो गृहा-न्निर्वासितः, क्व च राजकुमारः, क्व च वनवासः।"

राज्ञोक्तम्—"सांसारिकविषयासक्तेन स्त्रीजितेन मयैतत् कृतम्। इदानीं चिन्तयामि, यद् वने तं पुत्रम् एकाकिनं क्षुधितं शयानं सिंहादयः किं न खादन्ति? कथं स जीवनं

निर्वहति इति मे मनः सर्वदा खिद्यते। पुत्रात् प्रियतमं लोके किमपि न विद्यते।"

श्रीनारदः प्रोवाच—"राजन्! पुत्रस्ते लोकोत्तरं कार्यमनुतिष्ठति, श्रीहरिणा रक्षितं पुत्रं मा शुचः।" श्रीनारदवचसा उत्तानपादः शान्तिं लेभे।

अथ ध्रुवस्य तपसा प्रीतो हरिः तम् उवाच—"हे ध्रुव! तव वाञ्छितमहं वेद्मि तच्च ते ददामि, तव कल्याणमस्तु, न कोऽपि त्वां पराजेष्यते, अनश्वरं लोकत्रयागम्यं पदं ते दत्तमस्ति। भ्रातरि उत्तमे ते मृगयायां नष्टे सति सुरुचिस्तन्माता दावाग्निं प्रवेक्ष्यति, त्वं राजसिंहासनं प्राप्य सर्वलोके नमस्कृतमचलं मत्स्थानम् आगमिष्यसि।"

इत्युक्त्वा भगवान् श्रीहरिरन्तर्दधे, ध्रुवोऽपि स्वमनोरथं लब्ध्वा पित्रोश्चरणकमलानि प्रणमत्।

अभ्यास

१. पत्युः, राज्ञि, रुदन्, तेन, सति—इन पदों के शब्द विभक्ति और वचन लिखो।

२. शृणु, द्रक्ष्यसि, खिद्यते, प्रणमत्—इनका परिचय दो। श्रीनारद जी ने तप करते हुए ध्रुव को क्या कहा?

३. प्राप्य, लब्ध्वा, दृष्ट्वा, अभिधाय—इनके प्रकृति प्रत्यय पृथक् करके लिखो।

४. इस कथा से तुम क्या शिक्षा प्राप्त कर सकते हो ?

५. सन्धियुक्त करो—भार्ये + आस्ताम् । पर्यटन् + तत्र । साधु + इति । लभ्यते + इति ।

चित्रश्लोकाः

शब्दार्थ

करिणाम् = हाथियों के। क्षोणी = भूमि। विधत्ते = करती है। प्रसूते = उत्पन्न करती है। पिपीलिका = कीड़ी। अपदः = बिना पाँव के। साक्षरः = अक्षर सहित। स्फुटवक्ता = स्पष्ट कहने वाला। शूलपाणिः = (शूलं पाणौ यस्य सः, बहु०) महादेव। त्वग्वस्त्रधारी = (त्वक् एव वस्त्रं, तत् धारयति इति) छालरूपी वस्त्र को धारण करने वाला। सीमन्तिनीषु = स्त्रियों में। वन्द्य = प्रणाम करने योग्य। दार-पोषणरताः = स्त्री का पोषण करने वाले। लङ्घिता = टाली। कुला-लस्य = कुम्हार के। खे = आकाश में। रम्या = सुन्दर। वीरमर्कट-कम्पिता = (वीरैः मर्कटैः कम्पिता, तत्पु०) वीर वानरों से कम्पाई हुई।

कस्तूरी जायते कस्मात् ? को हन्ति करिणां कुलम् ?
किं कुर्यात् कातरो युद्धे ? मृगात् सिंहः पलायते ॥१॥

का खादति क्षोणिगतान् मनुष्यान् ?
कं हन्ति सिंहः प्रकटोग्रभावः ।
किं वा विधत्ते परिपूर्णगर्भा ?
पिपीलिका दन्तिवरं प्रसूते ॥२॥

अस्ति कुक्षिः शिरो नास्ति
बाहुरस्ति निरंगुलिः ।
अपदो नरराक्षी च
यो जानाति स पण्डितः ॥३॥
अपदो दूरगामी च
साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च
यो जानाति स पण्डितः ॥४॥
वृक्षाग्रवासी न च पक्षिराजः
त्रिनेत्रधारी न च शूलपाणिः ।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च धत्ते न घटो न मेघः ॥५॥
सीमन्तिनीषु का शान्ता ?
राजाभूत् को गुणोत्तमः ?
विद्वद्भिः का सदा वन्द्या ?
तत्रैवोक्तं न बुध्यते ॥६॥
कं संजघान कृष्णः ?
का शीतलवाहिनी गङ्गा ?

के दारपोषणरताः ?
कं बलवन्तं न बाधते शीतम् ॥७॥
किमिच्छति नरः काश्याम् ?
भूपानां को रणे हितः ?
को वन्द्यः सर्वदेवानाम् ?
दीयतामेकमुत्तरम् ? ॥८॥
तातेन कथितं पुत्र,
लेखमेकं लिखाधुना ।
न तेन लिखितो लेखः
पितुराज्ञा न लङ्घिता ॥९॥
कुलालस्य गृहेऽप्यर्धम्
तदर्धं हस्तिनापुरे ।
लङ्कायामपि तद्युग्मम्
यो जानाति स पण्डितः ॥१०॥
कः खे चरति ? का रम्या ?
का जप्या ? किं विभूषणम् ?
को वन्द्यः ? कीदृशी लङ्का ?
वीरमर्कटकम्पिता ॥११॥

अभ्यास

१. कस्तूरी जायते कस्मात् ? सीमन्तिनीषु का शान्ता ? विद्वद्भिः का सदा वन्द्या ?—रेखाङ्कितों में कारक विभक्तियाँ बताओ।

२. विधत्ते, प्रसूते, पलायते—इनके धातुओं के लोट्-मध्यम पुरुष के रूपों का वाक्यों में प्रयोग करो।

लोकविद्य-कथा

शब्दार्थ

सादृश्यवान्=सदृशता (समानता) रखने वाला। एकशराव-परिमिताः=एक कटोरा भर। दुराशयः=दुरात्मा। घातयितुम्=(हन्+णिच्+तुम्) (Infinitive) मरवाने को। प्रत्युद्धारे=बदला लेने में। परिवार-संहार-संभवस्य=(परिवारस्य संहारात् संभवो यस्य सः तस्य) परिवार का वध जिसका कारण है—उसका। परिचारिका=दासी। जहास=हँसी। स्वहितम्=अपना भला। एकमासावधिम्=एक महीने की अवधि। कारागृहकष्टनिर्बलम्=जेल के कष्ट के कारण निर्बल हुए हुए। प्रसङ्गज्ञानम्=आगे-पीछे के सम्बन्ध का ज्ञान। परामृष्टवान्=(परा मृश्+क्तवत्—P. A. P.) सोचता था। प्रपञ्चस्य=जगत् की। तर्कः=विचारशक्ति। विचक्षणः=चतुर। सौहार्दम्=मैत्री। यमपत्तनम्=यमपुरी, परलोक। उदाहृतः=कहा गया है। आरामः=उद्यान, बगीचा। क्षतम्=घाव। स्थल्याः=भूमि का। वृक्षायुर्वेदाध्ययनम्=वृक्षचिकित्साशास्त्र का अभ्यास। विमर्शातिशयः=अधिक विचारशक्ति। अभ्यासः=परिश्रम। क्षयाहः=मरण-दिन। पुरोधसा=पुरोहित के साथ। सम्प्रधार्य=विचार कर। निषण्णे=(नि+सद्+त—P. P. P.) बैठने पर। श्यावनखदन्तः=(श्यावाः नखाः दन्ताश्च यस्य सः—बहु०) काले नख और दांतों वाला। जातामर्षेण=(जातः अमर्षः यस्य सः, तेन-बहु०) जिसे क्रोध आया हुआ है। साधिक्षेपम्=तिरस्कारपूर्वक।

कृतप्रतिज्ञम्=(कृता प्रतिज्ञा येन सः, तम्—बहु०) प्रण किये हुए। कृतकृत्यः=(कृतं कृत्यं येन सः, बहु०) कार्य में सफल। अघ्नता = न (नञ्) + हन् + अत्—Pr. A. P. तृतीया। किसी का वध न करते हुए।

(१)

लोककर्मणि यो दक्षो विद्ययापि विना भवेत्।
फले सादृश्यवान् लोके लोकविद्यः स उच्यते ॥१॥

आसीत् कुसुमपुरे नन्दो नाम राजा। तस्य शकटारो नाम सचिवः। स च केनाप्यपराधेन सपुत्रकलत्रो राज्ञा कारागृहे प्रक्षिप्तः। तत्र तस्मै सपरिवाराय केवलमेकशराव-परिमिता एव सक्तवः भक्ष्यत्वेन दीयन्ते।

तद् दृष्ट्वा शकटारेण परिवारेष्वभिहितम्—यदयं राजा दुराशयः विनापराधेनास्मान् कष्टं दत्त्वा घातयितु-मुद्यतः। शरावमात्रैः सक्तुभिरेकस्य नरस्याहारसिद्धि-रसम्भवा, किं पुनः सर्वपरिवारस्य। ततः स एव खादतु सक्तुशरावं योऽस्य वैरस्य प्रत्युद्धारे समर्थो भवेत्, अथवा ऽनाहारेण सर्वेषामेव मरणं निश्चितम्।

परिवारैरुक्तम्—आर्य! यदि भवान् जीवति तदैव कदाचित् अस्य परिवार-संहार-संभवस्य वैरस्य प्रत्युद्धारः सम्भवति। तदा सकलपरिवाराणां परामर्शेण शकटार एव

तदन्नं खादित्वा स्व-प्राण-रक्षणं कृतवान् । परिवारास्तस्य एकैकं कृत्वा मृताः ।

एकदा स राजा नन्दः प्रसादान् मन्दं स्मितं कुर्वन् बहिर्बभूव । तं हसन्तं दृष्ट्वा तस्य परिचारिका विचक्षणा नाम चेटी अपि जहास ।

तां हसन्तीमवलोक्य राजोवाच—रे विचक्षणे, कुतो हससि ?

विचक्षणा प्रत्युवाच—यतो देवो हसति ।

राजोवाच—मया कुतो हस्यते ?

तयोक्तम्—तदहं न जानामि ।

राजा सरोषमुवाच—आः पापे ! त्वयैवोक्तं यतो देवो हसति ततोऽहमपि हसामि । पुनरिदानीं त्वमेव वदसि यदहं देवस्य हास्यकारणं न जानामि । यदि स्वहितमिच्छसि तदा कथय मे सत्वरं हास्यकारणम् ।

तया कम्पमानयोक्तम्—देव, सद्यः कथयितुमसमर्था, तद्देहि मे एकमासावधिम् । तदनन्तरं कथयिष्यामि ।

तदा लब्धावधिः सा दासी चिन्तयामास—नास्य प्रश्नस्योत्तरं सुबुद्धिपरामर्शं विना दातुं शक्यते । ततः सुबुद्धिं कमपि पृच्छामि । सुबुद्धिषु प्रथमः शकटारः, स

च राज्ञा कारागृहे पातितः, तत्रैदानीं तिष्ठति ततस्तमेव कथञ्चिद् उपगम्य पृच्छामि ।

इति परामृश्य सा तत्र गतवती । तत्र च कारागृहे कष्ट-निर्बलं शकटारं मिष्टान्न-पानैः परितोष्य राजप्रश्नोत्तरम् अपृच्छत् ।

शकटारोऽब्रवीत्—विचक्षणे ! प्रसङ्गज्ञानं विना कथं परिच्छेत्तुं शक्यते राज-हास्य-कारणम् । तदवसरं कथय । विचक्षणाऽवसरं कथितवती ।

(२)

शकटार उवाच—त्वं कथयसि यन् मूत्रप्रवाहं दृष्ट्वा पश्चाद् अश्वत्थवृक्षं पश्यन् राजा जहास । पूर्वदृष्टस्य कस्यापि वस्तुनोऽवलोकनं न हासकारणम् । आ ज्ञातम् ! मूत्रप्रवाहे वहत् क्षुद्रतरम् अश्वत्थबीजं दृष्ट्वा तदुद्भूतं च विशालं वृक्षं पश्यन् परामृष्टवान्—अहो वैचित्र्यं विधातुः प्रपञ्चस्य ! क्वेदं क्षुद्रं बीजम् क्व च विशालोऽयं वृक्षः तदुद्भव एवेति । एवं परामृश्य हसितं भूपालेन पुनः पुनः । विचक्षणा तदेव राज्ञः पुरत उक्तवती यदुक्तं शकटारेण ।

राजोवाच—विचक्षणे ! सत्यं कथय शकटारो जीवन् वर्तते ? न तं विना कस्यापि बुद्धिरेवं तीव्रा ।

विचक्षणोवाच—देव ! शकटारो जीवति, परं कारागृह-पतितः जीवन्नपि मृत एव ।

राज्ञा चिन्तितम्—अहो तर्कः शकटारस्य ! न मया सुष्ठु कृतं यत् शकटारसमो विचक्षणः सचिवोऽकारणं कारागृहे क्षिप्तः तदधुनैव तं विमोच्य पूर्ववत् सम्मान-पात्रं कृत्वा तत्पदं तस्मै ददामि ।

एवं विमृश्य शकटारः पुनरानीय मुख्यमन्त्री कृतः ।

शकटारस्तु तां पदवीमासाद्य चिन्तयामास—अहो दुर्नीतिरस्य राज्ञः । सकलपरिवारं मम हत्वा मामेव मन्त्रिपदव्यां स्थापयति । मूलमुच्छिद्य दले जलं ददाति । तथाहि—

यः पूर्वं वैरमुत्पाद्य पुनः सौहार्दमिच्छति ।
यम-पत्तन-यात्रायाः स पन्थानमपेक्षते ॥२॥

तदिदानीं किमुचितम् ? किं करवाणि ? संदिग्ध-चित्तोऽस्मि । (पुनः विमृश्य) मया तु वैरोद्धारार्थम् एव जीवनं स्वीकृतमासीत् । यदनेन दुरात्मना पश्यतो मम पुत्रादयो हताः तद्वैरमेवोद्धरणीयम् । नराधमोऽयम्, अतः हन्तव्य एव । यतः—

पापात् त्रस्यति यः स एव पुरुषः स्यादुत्तमो भूतले,
पापात्माऽपि बिभेति योऽपयशसः स ज्ञायते मध्यमः।
त्रासो यस्य न पातकादपि न वा घोरापराधादपि,
प्रज्ञावद्भिरुदाहृतोऽयमधमः सर्वत्र निन्दास्पदम् ॥३॥

इति चिन्तयन्नेव स कदाचिद् आराम-दर्शन-कौतुकेन तुरगारूढो भ्रमन् पुराद् बहिर्निर्जगाम। तत्र च कुशान् उत्पाट्य तन्मूले तक्रं ददानं ब्राह्मणमेकं ददर्श। तं दृष्ट्वा शकटार उवाच—प्रिय ! कस्त्वम् ? किमिदं कुरुषे ?

(३)

एवमुक्तः स प्रत्युवाच—चाणक्यो नाम ब्राह्मणोऽहम्। साङ्गं वेदमधीत्यानेन पथा विवाहार्थितया गच्छतो मे पादे कुशाङ्कुरेण क्षतं कृतम्। तेन विवाहभङ्गः संजातः। अतोऽहं प्रतिज्ञातवानस्मि यद् अस्याः स्थल्याः कुशं निर्मूलं करिष्ये, ततो वृक्षायुर्वेदाध्ययनं कृतम्। तत्र च परिज्ञातं यत् तक्रेण कुशा विनश्यन्ति।

तदाकर्ण्य शकटारश्चिन्तयामास—अहोऽस्य ब्राह्मणस्य विमर्शातिशयः ! अहो उपायप्रवीणता ! यद्ययं मम वैरिणो वैरी भवति तदाहं वैरोद्धारकर्मणि विना आयासं कृतार्थो भवामि।

ततः शकटारः स्वकीयसाहाय्येन तत्समीहितं कुशोन्मूलं कारयित्वा तं ब्राह्मणं स्वगृहमानीतवान् ।

अथ काले याते राज्ञः पितृ-क्षयाह-श्राद्ध-दिवसः समागतः । स च शकटारमेकं ब्राह्मणमानेतुम् आदिशत् । शकटारश्च राज्ञः पुरोधसा सम्प्रधार्य चाणक्यमेव पात्रत्वे-नोपनीतवान् ।

अथ राज्ञि श्राद्धं कर्तुम् उद्यते ब्राह्मणे च दत्तासन-निषण्णे मन्त्री राक्षस उवाच—देव ! नायं ब्राह्मणः पात्र-योग्यः यतः योऽकृतविवाहः, कपिलं श्याव-नख-दन्तश्च स विप्रः पात्रानर्हः ।

मन्त्रि-राक्षसस्य तद् वचनं श्रुत्वा जातामर्षेण राज्ञा दुर्दैवदेशितेन पात्रासनादवतार्य साधिक्षेपं चाणक्यो बहिर्निस्सारितः । ततश्च तं तथाविधापमान-क्रुद्धं तद्वधे कृतप्रतिज्ञं विज्ञाय शकटारो मन्त्री कृतकृत्यो देहत्यागाय वाराणसीं जगाम ।

विचक्षणा परित्राता चाणक्यश्च परीक्षितः ।
बुद्ध्यैव शकटारेण वैरमुद्धतमग्नता ॥४॥

अभ्यास

१. नन्द ने शकटार को क्या दण्ड दिया था ? शकटार ने

परिवार के लोगों से क्या निश्चय किया ? विचक्षणा को देखकर राजा ने क्या कहा ? उसने किसका आश्रय लिया ?

२. लब्धावधिः, एकमासावधिम् , परिवार-संहार-संभवस्य—इन समस्त पदों के विग्रह करो और समासों के नाम बताओ।

३. सक्तवः भक्ष्यत्वेन दीयन्ते। शकटारेणाभिहितम् । हास्य-कारणं जानामि ।—इनके वाच्य बदलो।

४. इनमें सन्धिविच्छेद करो—

विद्ययापि, शकटारो नाम, नरस्याहारसिद्धिरसम्भवा, एकमासावधिम् , तत्रैवेदानीम् ।

५. शकटार ने राजा के हास्य का क्या कारण बताया ? नन्द ने कैसे जाना कि शकटार जीवित है ? शकटार ने राजा से बदला लेना क्यों चाहा ? उसने क्या किया ? वन में उसने क्या देखा ?

६. ददानम् , हन्तव्यः, विमोच्य, परामृष्टवान्—इनके प्रकृति-प्रत्यय बताकर इनके क्तान्त रूपों का वाक्यों में प्रयोग करो।

७. विशालः, क्षुद्रम् , प्रज्ञावान्—इन विशेषणों के तुलनावाचक रूप दो।

८. उस ब्राह्मण का नाम क्या था ? वह वन में क्या कर रहा था ? उससे शकटार ने क्या निश्चय किया ? वह उसे कहाँ ले गया ? नन्द ने उसे क्यों निकाल दिया ? ब्राह्मण ने उस अपकार का प्रतिशोध कैसे किया ?

९. काले याते, विना आयासम् , देहत्यागाय वाराणसीं जगाम। रेखाङ्कित पदों के कारक लिखो।

१०. उद्धार में किस धातु के साथ कौन उपसर्ग है? इसी धातु के साथ तीन अन्य उपसर्ग अलग-अलग लगाकर उन पदों का प्रयोग वाक्यों में करो—

११. इनमें सन्धिच्छेद करो—

बुद्धश्चैव, चाणक्यश्च, पात्रानर्हः, पात्रत्वेनोपनीतवान्, कुशा विनश्यन्ति।

युद्धवीरकथा

शब्दार्थ

कातराः = कायर । उद्वेगे = चिन्ता में । शिथिल = ढीला । शौर्यमूलकः = (शौर्यं मूलं यस्य सः, बहु०) शूरता जिसका कारण है । आसमुद्रकरग्राहिणः = समुद्रपर्यंत पृथ्वी के निवासी लोगों से कर लेने वाले । परिपन्थी = मुकाबला करने वाला, शत्रु । प्रयाण = आक्रमण, चढ़ाई । परिमितबलस्य = अल्प सेना वाले का । उद्दिश्य = लक्ष्य कर । परामर्शम् = तर्क-वितर्क । अविमृश्यकारिणः = बिना विचारे काम करने वाले । स्वापराधविपन्नानाम् = अपने दोष के कारण विपत्ति में पड़े हुओं का । अनभिमतम् = अनिष्ट । यमपुरुषानिरीक्ष्यमाणम् = (यमस्य पुरुषाः यमपुरुषाः, तैः न निरीक्ष्यमाणम्—तत्पु०) यमराज के सेवकों की जहाँ दृष्टि नहीं पहुँचती । अमरः = मरण रहित । असंख्यबलसहितः = अगण्य (गणना से रहित, बहुत, अत्यधिक) सेना के साथ । कुञ्जरारूढः = हाथी पर सवार । संधानार्थिनः = सन्धि चाहने वाले । प्रतिमल्लता = प्रतिद्वन्द्वता ।

(१)

कातरः शूरतां याति क्रियावानलसो भवेत् ।
युद्धवीरकथां श्रुत्वा जयमाप्नोति साम्प्रतम् ॥१॥

आसीन् मिथिलायां मान्यदेवनाम्नो राज्ञः पुत्रो मल्लनामधेयः कुमारः । स चिन्तयामास—यदहं युवराजोऽपि

पितुरुपार्जितराज्ये सुखमनुभवामीति न मम पौरुषम् ।

सिंहाः सत्पुरुषाश्चैव निजदर्पोपजीविनः ।

पराश्रयेण जीवन्ति कातराः शिशवः स्त्रियः ॥२॥

ततः क्वापि भुजबलेन पौरुषमर्जयामीति परामृश्य स कुमारः कान्यकुब्जं नाम जनपदं जगाम । तत्र च श्रीचन्द्रदत्तनाम्नो राज्ञः काशीश्वरस्य सभां प्राप्तः । राजा तच्छौर्य्याकृष्टः तमात्मसहचरमकरोत् । कुमारोऽपि तत्सेवायां प्रवृत्तः ।

अथ काले यांते तेनालोचितम्—यन् नृपतिस्तं न पूर्ववद् आदरदृष्ट्या अवलोकयति ।

एवमवधार्य तेनैकदा महाराज उक्तः—देव ! भवतः प्रभुधर्मं श्रुत्वाऽहमिहागतोऽस्मि, साम्प्रतमन्यत्र यास्यामि ।

राजोवाच—कुमार ! किं तवोद्वेगे कारणम्, येनान्यत्र यासि ?

मल्लदेव उवाच—देव ! भवतः समादरः क्रमेण शिथिलो भवति—इत्याशंक्याहमितोऽन्यत्र गच्छामि ।

राजोवाच—कथमवगतमिदम् ?

कुमार उवाच—शौर्यमूलको मादृशां समादरो भवति, शौर्यन्तु वाग्युद्धेन केवलं ख्यापयितुमशक्यम् । अद्य युद्ध

तु भवतो राज्ये न दृश्यते ।

राजोवाच—आसमुद्र-कर-ग्राहिणो मम युद्धे परिपन्थी कोऽपि नास्ति, तत्केन समं युद्धं भविष्यति ?

कुमार उवाच—देव ! राज्यस्य फलं विजयसुखम् । विना युद्धेन कुतो विजयः कुतो वा सुखम् ! यदि देवो मन्यते तदाहमितो गच्छामि । यस्य च राज्यमहं गमिष्यामि स एव देवस्य युद्धपरिपन्थी भविष्यति ।

राजा सक्रोधमाह—रे कुमार ! कस्त्वं कुमारः ! केन वा दर्पेणैवं भाषसे ? गच्छ तावद् यत्र गच्छसि । यत्र त्वं यास्यसि तत्रैवाहं प्रयाणं करिष्यामि ।

मल्लदेव उवाच—अयमहं गच्छामि ।

(२)

ततः कुमारः चीत्कारनाम्नो राज्ञो राज्यं जगाम । ततस्तं तत्रगतं श्रुत्वा काशीश्वरस्तुरग-बल-सहितः चीत्कारदेशम् आक्रान्तवान् ।

कियतापि कालेन तं सन्निधानमागतं श्रुत्वा चीत्कारः स्वमन्त्रिभिः समं मन्त्रयामास । मन्त्रिण ऊचुः—देव ! भवतः परिमितबलस्य तेन महाबलेन युद्धं नोचितम् । तदिदानीं पलायनेनात्मरक्षणमेवोचितम् ।

ततः पलायितुमुद्यतं चीत्कारराजानं दृष्ट्वा मल्लदेवोऽब्रवीत्—राजन्, किमिति पलायसे ? भवन्तमुद्दिश्य काशीश्वरो न कदाप्यागतो नवाग्रेऽप्यागमिष्यति । भवता न भेतव्यम् ।

चीत्कार उवाच—किं तन्निमित्तम् ?

मल्लदेवो पूर्वकथां कथयामास ।

चीत्कारोऽवदत्—तर्हि किमुचितम् ?

मल्लदेवोऽब्रवीत्—स यतो मामेवोद्दिश्य समायाति ततो भवता न पलायितव्यम् । किं च, मयैकेन समं बहूनां तत्सुभटानां संग्रामे कुतूहलं द्रष्टव्यम् ।

चीत्कार उवाच—कुमार, तेन महाराजेनानन्तबलेन समम् एकाकिनस्तव न समुचितं युद्धम् । रीतिविरुद्धमेतत् ।

कुमार उवाच—शूरः स्वकर्मणि परामर्शं न सहते ।

चीत्कार उवाच—कुमार, अविमृश्यकारिणः विपदं लभन्ते ।

कुमार उवाच—देव, अलममुना विवादेन ।

स्वयं करिष्ये यत् कर्म भोक्ष्ये तस्य स्वयं फलम् ।
स्वापराधविपन्नानां विपत्तिः केन शोच्यते ॥२॥

चीत्कार उवाच—

युक्तं तुल्यबलं युद्धं यत्रास्ति जयसंशयः ।
प्रबलेऽरिबले वह्नौ के पतन्ति पतङ्गवत् ॥३॥

कुमार उवाच—

प्राणत्राणाय संग्रामात् पलायन्ते हि ये नराः ।
मृत्युरावश्यकस्तेषां कार्पण्यमतिरिच्यते ॥४॥

चीत्कार उवाच—कुमार, भवान् महावीरः काशीश्वरो महाराजस्ततो युवयोः संग्रामोऽस्माभिः श्रोतुमपि न शक्यते, किं पुनर्द्रष्टुम् ।

कुमार उवाच—यदि भवतो युद्धस्य दर्शनमप्यनभिमतं तदा भवान् गच्छतु क्वापि यमपुरुषानिरीक्ष्यमाणं स्थानम्, गत्वा च भवत्वमरः । मया शून्यस्यापि भवतो नगरस्यावेक्षा कर्तव्या ।

(३)

चीत्कारः नगरात् पलायितः । तदग्रिम-प्रभातेऽसंख्य-बल-सहितो महाराजो जयचन्द्रस्तन्नगर-सन्निधानमाजगाम । मल्लदेवः तमागतं ज्ञात्वा परिगृहीतास्त्रः गजारूढः पुरो गत्वा राजानं ददर्श ।

राजोवाच—कस्त्वं रे कुञ्जरारूढ, संधानार्थिनश्ची-

त्कारस्य दूतो वा युद्धार्थिनो मल्लदेवस्य वा ?

मल्लदेव उवाच—देव, नहि दूतो, न संधानार्थी, किन्तु तव प्रतियुद्धार्थी मल्लदेवोऽस्मि ।

राजा विहस्याह—भद्र, मम प्रतिमल्लता सिद्धैव। त्वमिदानीमनुसर माम् ।

मल्लदेव उवाच—त्वमेव किं न मामनुसरसि ? संप्रति त्वं तुरगारूढोऽसि, अहं गजारूढोऽस्मि । त्वमप्यस्त्राणि धारयसि, अहमप्यस्त्राणि धारयामि । तदिदानीं प्रहार-समये क्व वचन-वैचित्र्यावकाशः ।

राजा साश्चर्यं सैनिकान् आह—'रे रे सुभटाः ! मल्लदेवं धृत्वा मे दत्त ।' ते च सर्वे तमाक्राम्यन् ।

ततो निरोद्धुकामान् परितो भटान् बहून् मल्लदेवः खड्गप्रहारैर्यमसदनं प्रहितवान् ।

तेन विनिहतान् निज-प्रिय-सुभटान् भूमौ पतितान् दृष्ट्वा जयचन्द्रः सैनिकानादिदेश—रे वीराः, यद्येनं मुमूर्षु-मवरोद्धुं न शक्नुथ तदा शरासारैः स्नपयत । ततस्तां प्रभोराज्ञामासाद्य सुभटास्तं मल्लदेवं युगपदेव शरासारै-रभ्यषिञ्चन् । शर-शकलित-शरीरः स कुञ्जराद् भूमौ पपात ।

अशीति-वर्ष-देशीयश्चीत्कारः प्रपलायितः ।
षोडशाब्दः कुमारस्तु सम्मुखः पतितो रणे ॥५॥

तं च संग्रामभूमौ पतितं दृष्ट्वा राजोवाच—कुमार ! जीविष्यसि ?

मल्लदेवः—आवयोः केन जितं युद्धम् ?

राजोवाच—भवता जितम् ।

मल्लदेवोऽवदत्—कथमिदानीमवधारणीयम् ? राजोवाच—

अस्माभिः कृतसंग्रामो यदेको बहुभिर्हतः ।
जिगीषसि तथाप्यस्मान् कथं न विजयी भवान् ॥६॥

ततस्तेन राज्ञः प्रशंसावचनेन पुलकितगात्रो मल्लदेवोऽब्रवीत्—देव ! जीविष्यामि ।

तदनन्तरं तच्छौर्यपरितुष्टेन जयचन्द्रेण राज्ञा स कुमारः शरान् उद्धृत्य स्वस्थानं नीतः, पुत्रप्रेम्णा परिपाल्य क्षतेषु निर्वाणेषु, प्रतिनिधिः कृतश्च ।

अभ्यास

१. मल्लदेव पिता का राज्य क्यों छोड़ गया ? उसे कहाँ पर वृत्ति मिली ? काशीश्वर का आश्रय भी उसे क्यों छोड़ना पड़ा ? काशीश्वर और मल्लदेव में जो बातचीत हुई थी उसका सार लिखो।

२. काशीश्वर को छोड़कर मल्लदेव कहाँ गया ? काशीश्वर ने

तब क्या किया ? चीत्कार क्यों डर गया ? मल्लदेव ने उसको ढारस (सान्त्वना) कैसे दिलाया ? मल्लदेव और चीत्कार की प्रश्नोत्तरी का भाव संक्षेप में लिखो।

३. चीत्कार क्यों भाग गया ? काशीश्वर और मल्लदेव के विग्रह का वर्णन करो। युद्ध में मल्लदेव की क्या दशा हुई ? राजा उससे क्यों प्रसन्न हुआ ? परिणाम क्या हुआ ? इस कथा का आदर्श क्या है ?

४. युवराजः, सत्पुरुषः, भुजबलम्, शौर्यमूलकः—इनके विग्रह बताकर समासों के नाम दो।

५. पुत्रप्रेम्णा, षोडशाब्दः, खड्गप्रहारैः, तुरगारूढः—इनके विग्रह बताओ।

६. भाषसे, अकरोत्, दृश्यते—इनकी धातुओं के शत्रन्त रूपों का वाक्यों में प्रयोग करो।

७. उद्धृत्य, परिपाल्य, प्रपलायितः, प्रहृतवान्—इनके प्रकृति-प्रत्यय बताकर यह भी बताओ कि प्रत्येक के साथ कौन-कौन उपसर्ग जुड़े हैं ?

८. इनमें सन्धिच्छेद करो—

तच्छौर्यकृष्टः, शौर्यन्तु, येनान्यत्र, सत्पुरुषाश्चैव, इत्याशंक्याहमितोऽन्यत्र।

९. कुमारोऽपि तत्सेवायाम···। साम्प्रतम्···यास्यामि। अद्य भवतो···न दृश्यते। इनमें रिक्त स्थानों को पूर्ण करो।

१०. विपत्तिः केन शोच्यते। अविमृश्यकारिणो विपदं लभन्ते। इनके वाच्य बदलो।

११. युक्तम्, द्रष्टव्यम्, आक्रान्तम्—इनके प्रकृति-प्रत्यय बताकर इनके धातुओं के क्तवत्-अन्त रूप बताओ।

इन्दुमतीस्वयंवरः

शब्दार्थ

श्लाघ्यम् = प्रशंसनीय । उरुकीर्तिः = बड़ी कीर्ति वाला । वातोऽपि = हवा भी । अंशुकानि = वस्त्रों को । मृत्पात्रशेषाम् = सब धन दान करने के कारण केवल मृत्तिका के पात्र ही जिसके पास बाकी बचे हैं । गुर्वीम् = भारी । यूनि = जवान में । स्रजा = माला से ।

इक्ष्वाकुवंश्यः ककुदं नृपाणां,
ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थ-शब्दं यत उन्नतेच्छाः,
श्लाघ्यं दधत्युत्तरकोशलेन्द्राः ॥१॥

महेन्द्रमास्थाय महोक्षरूपं,
यः संयति प्राप्तपिनाकिलीलः ।
चकार बाणैरसुराङ्गनानां,
गण्डस्थलीः प्रोषित-पत्रलेखाः ॥२॥

ऐरावतास्फालन-विश्लथं यः,
संघट्टयन्नङ्गदमङ्गदेन ।
उपेयुषः स्वामपि मूर्तिमत्त्या-
मर्धासनं गोत्रभिदोऽधितष्ठौ ॥३॥

जातः कुले तस्य किलोरुकीर्तिः,
कुलप्रदीपो नृपतिर्दिलीपः ।
अतिष्ठदेकोनशतक्रतुत्वे
शक्राभ्यसूया-विनिवृत्तये यः ॥४॥
यस्मिन्महीं शासति वाणिनीनां,
निद्रां विहारार्धपथे गतानाम् ।
वातोऽपि नास्रंसयदंशुकानि,
को लम्बयेदाहरणाय हस्तम् ॥५॥
पुत्रो रघुस्तस्य पदं प्रशास्ति,
महाक्रतोर्विश्वजितः प्रयोक्ता ।
चतुर्दिगावर्जितसंभृतां यो,
मृत्पात्रशेषामकरोद् विभूतिम् ॥६॥
आरूढमद्रीनुदधीन् वितीर्णं,
भुजंगमानां वसतिं प्रविष्टम् ।
ऊर्ध्वं गतं यस्य न चानुबन्धि,
यशः परिच्छेत्तुमियत्तयालम् ॥७॥
असौ कुमारस्तमजोऽनुजात-
स्त्रिविष्टपस्येव पतिं जयन्तः ।

गुर्वीं धुरं यो भुवनस्य पित्रा,
धुर्य्येण दम्यः सदृशं बिभर्ति ॥८॥

कुलेन कान्त्या वयसा नवेन,
गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व,
रत्नं समागच्छतु काञ्चनेन ॥९॥

ततः सुनन्दावचनावसाने,
लज्जां तनूकृत्य नरेन्द्रकन्या ।
दृष्ट्या प्रसादामलया कुमारं,
प्रत्यगृहीत् संवरणस्रजेव ॥१०॥

सा यूनि तस्मिन्नभिलाषबन्धं,
शशाक शालीनतया न वक्तुम् ।
रोमाञ्चलक्ष्येण स गात्रयष्टिं,
भित्त्वा निराक्रामदरालकेश्याः ॥११॥

तथागतायां परिहासपूर्वं,
सख्यां सखी वेत्रभृदावभाषे ।
आर्ये व्रजामोऽन्यत इत्यथैनां,
वधूरसूयाकुटिलं ददर्श ॥१२॥

सा चूर्णगौरं रघुनन्दनस्य,
धात्री कराभ्यां करभोपमोरुः ।
आसञ्जयामास यथाप्रदेशं,
कण्ठे गुणं मूर्तमिवानुरागम् ॥१३॥
तया स्रजा मङ्गलपुष्पमय्या,
विशालवक्षःस्थललम्बया सः ।
अमंस्त कण्ठार्पितबाहुपाशां,
विदर्भराजावरजां वरेण्यः ॥१४॥
शशिनमुपगतेयं कौमुदी मेघमुक्तं,
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः,
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥१५॥

अभ्यास

१. ककुत्स्थ कौन था ? दिलीप ने कितने यज्ञ किये थे और क्यों किये थे ? दिलीप का शासन कैसा था ? विश्वजित् यज्ञ किसे कहते हैं और वह कब किया जाता है ? 'रत्नं समागच्छतु काञ्चनेन' इसका अभिप्राय स्पष्ट करो। सुनन्दा कौन थी ?

२. आसञ्जयामास, विवव्रुः, ददर्श, बिभर्ति, प्रतिष्ठन्—इनके धातु, लकार, पुरुष, वचन बताओ।

३. गोत्रभिदः, विनिवृत्तये, विभूतिम्, वयसा—इनके शब्द, विभक्ति, वचन बताओ।

गोपालकृष्णगोखले

शब्दार्थ

सुवाग्मी = अच्छा बोलने वाला। वावदूकः = खूब बोलने वाला। प्राप्तुमपारयत् = पा सकते थे। निश्चिनोति स्म = निश्चय किया हुआ। पुण्यपत्तनम् = पूना। अन्तेवासिनः = शिष्य। शासकसमक्षम् = हुकूमत के सामने। निशम्य = सुनकर। प्रायतत = प्रयत्न किया। पुरन्दरपुर = स्वर्ग।

महानुभावोऽयं नृपस्य प्रजावर्गस्य चोभयोर्हिताभिलाषी सम्मानपात्रश्चाभूत्। महोदयस्यास्य सुसरलः स्वभावो विद्वत्ता गम्भीराऽऽसीत्। एष सुवाग्मी वावदूकश्चाभवत्। जनिरस्याभवत्त्रयोविंशत्यधिकैकोनविंशतिशततमे वैक्रमेऽब्दे कोल्हापुरनगरस्थे एकस्मिन् महाराष्ट्रविप्रवंशे। तस्मिन्नेव नगरेऽभूदस्य प्रारम्भिकी शिक्षा। ततोऽसौ मुम्बय्याम् 'एल्फिस्टन कॉलेज' नाम्नि विद्यालये पठन्नास्ते। अलब्ध चाष्टादशवर्षावस्थायामेव बी. ए. (B.A.) उपाधिम्।

तेषु दिनेषु बी. ए. उपाधिधारिणां सुवेतनान्युच्चपदानि मिलन्ति स्म। पुनरेष सुयोग्यविद्यार्थिषु श्रेष्ठतया

साम्राज्य उत्तमतमं पदं प्राप्तुमपारयत् । परमुदाराशयोऽयम्महाभागः स्वार्थबुद्धिमपहाय परार्थोपरि दृष्टिं ददौ । निश्चिनोति स्म च यदध्यापकतां विधाय देशसेवा कर्तव्येति । अतः पुण्यपत्तनस्थे 'फरगुसन कॉलेज' नाम्नि विद्यामन्दिरे स्वनिर्वाहमात्रां वृत्तिमङ्गीकृत्योपाध्यापकतां ययौ, चकार च विंशतिवर्षपर्यन्तं सुयोग्यतया तत्कार्यम् । एतस्मिन्नन्तरे तीक्ष्णबुद्धीनुदाराशयान् बहूनन्तेवासिन आत्मकल्पानकरोत् । येष्वेव पाठनधुरन्निहितवानसावधुना प्रकारान्तेण देशसेवां कर्तुमारब्धवान् । तदित्थम्— यत् प्रजाजनस्य दशां शासकसमक्षं यथायथं निवेद्य सुधारितवान् । ततश्च भारतन्यायकारिण्याः समितेः सभ्यो बभूव, तत्रापि प्रकृतीनां हितकाम्यया सुनीतिज्ञतया वाक्पटुतया च प्रकृतिहिताननेकान्नियमान्निर्मापयन्नासीत् । तत्र व्याख्यानावसरेऽनुक्षणमस्य हृदयस्योदारभाव आविर्भूय विरेजे । महेच्छ एष इँग्लैण्ड-देशं गत्वा भारतीयप्रजाहितसाधनोपायान् करोति स्म, प्रजासु च राजभक्तिं प्रसारयति स्म ।

अफ्रीका-महाद्वीपस्थ - प्रवासिभारतीयानां कष्टं निशम्य त्वरितं तत्र जगाम । तत्रत्यशासकसमुदायेन

प्रजावर्गेण प्रवासिभारतीयैश्च सम्मानितस्सन् तत्र भारतीय-लोकमाश्वास्य साम्राज्य-साहाय्यद्वारा तेषां दुःखनिवारणाय प्रायतत ।

सर्वथायं शान्तिप्रिय आसीत्, महाशयोऽयं समाजमेकं स्थापितवान् यस्य नाम 'भारतवर्षसेवकसमाज' इत्यस्ति । समाजस्यास्य सामाजिकाः सुयोग्या विद्वांस एव भवन्ति, तेषां स्वदेशसेवाकरणमेवैकमात्रं व्रतम् । एष समाजस्त्वद्यावधि स्थितोऽस्ति परं नास्य स्थापयिताऽस्मिञ्जगति ।

अनेन महात्मना न कदापि धनाशा कृता नापि यशःकांक्षा । यदि कापीच्छा कृता सा भारतवर्षस्य भारतीयानां हिताभिलाषास्ति । इमामेव भारतहिताभिलाषां कार्यरूपे परिणतामप्यकार्षीत् । इत्थं परोपकार एव लग्न आयुषोऽवसानत्वादेकसप्तत्यधिकोनविंशतिशततमेऽब्दे पुरन्दरपुरातिथिर्जातः । युक्तमुक्तम्—

परोपकाराय सतां विभूतयः ।
परोपकारैकधियः स्वसुखाय गतस्पृहाः ।
जगद्धिताय जायन्ते साधवस्तत्समा भुवि ॥१॥

सृजति तावदशेषगुणाकरं
पुरुषरत्नमलंकरणं भुवः ।
तदपि तत्क्षणभङ्गि करोति चे-
दहह कष्टमपण्डितता विधेः ॥२॥

अभ्यास

१. गोखले म० का जन्म कहाँ और कब हुआ ? इन्होंने उत्तमोत्तम पदों को छोड़कर अध्यापकता क्यों स्वीकार की ? इनका स्वभाव कैसा था ? इन्होंने किस प्रकार देश-सेवा की ? इँग्लैण्ड तथा अमेरिका जाकर इन्होंने क्या किया ? इनकी अभिलाषा क्या थी ?

२. मिलन्ति स्म—यहाँ 'स्म' के प्रयोग से अर्थ में क्या परिवर्तन होगया ? 'अध्यापकताम्' में द्वितीया, 'सुयोग्यतया' में तृतीया, 'प्रजासु' में सप्तमी विभक्ति के प्रयोग का कारण लिखो ।

३. पठन्, प्राप्तुम्, अङ्गीकृत्य, निहितवान्, अपहाय, स्थापयिता—इन शब्दों में प्रकृति-प्रत्यय विश्लेषण कीजिए ।

सुभाषितपद्यानि

शब्दार्थ

नवनीतम् = लौनीघृत । निशितः = पैना । वाङ् = वाणी । कौशेयम् = रेशमी वस्त्र । तामरसम् = कमल । इन्दीवर = काला कमल । गोपित्ततः = गाय के पित्ते से । त्रपुणि = राँगे (के गहने) में । योजयितुः = लगाने वाले की । वचनीयता = निन्दा । गोप्यम् = छिपाने योग्य । उपेक्षितः = जिसकी कुछ परवाह न की गई हो । श्ववृत्तिः = कुत्ते के समान वृत्ति । पेटके = पेटी (तिजोरी) में । ध्रौव्यम् = स्थिरता । रुजा = रोग से ।

नवनीतं हृदयं ब्राह्मणस्य,
वाचि क्षुरो निशितस्तीक्ष्णधारः ।
तदुभयमेतद् विपरीतं क्षत्रियस्य,
वाङ् नवनीतं हृदयं तीक्ष्णधारम् ॥१॥

कौशेयं कृमिजं सुवर्णमुपलाद् दूर्वापि गोरोमतः,
पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात् ।
काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना,
प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना ॥२॥

कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रणिधीयते ।

न स विरौति न चापि सुशोभते,
भवति योजयितुर्वचनीयता ॥३॥
दारेषु किञ्चित् स्वजनेषु किञ्चिद्,
गोप्यं वयस्येषु सुतेषु किञ्चित् ।
युक्तं नवा युक्तमिदं विचिन्त्य,
वदेद् विपश्चिन्महतोनुरोधात् ॥४॥
उपेक्षितः क्षीणबलोऽपि शत्रुः,
प्रमाददोषात् पुरुषैर्मदान्धैः ।
साध्योऽपि भूत्वा प्रथमं ततोऽसा-
वसाध्यतां व्याधिरिव प्रयाति ॥५॥
अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः ।
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ॥६॥
सम्पत्तयः परायत्ताः सदा चित्तमनिर्वृतम् ।
स्वजीवितेऽप्यविश्वासस्तेषां ये राजसेवकाः ॥७॥
जीवन्तोऽपि मृताः पञ्च व्यासेन परिकीर्तिताः ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥८॥
सेवा श्ववृत्तिराख्याता यैस्तैर्मिथ्या प्रजल्पितम् ।
स्वच्छन्दं चरति श्वात्र सेवकः परशासनात् ॥१९॥

हा मातः कमले ! धनी तव सदा वृद्ध्यै करोति श्रमं,
शीतादिव्यसनं प्रसह्य सततं त्वां पेटके न्यस्यति ।
चौरेभ्यः परिरक्षणाय लभते निद्रासुखं नो क्वचिद्
ध्रौव्यं नो भजसे तथापि चपले ! त्वं निर्दया कीदृशी ॥१०॥

रोगादि-पीडितमतीव कृशं विलोक्य,
किं मूढ ! रोदिषि विहाय विचारकृत्यम् ।
नाशे तनोस्तव न नश्यति कश्चिदंशो
ज्योतिर्मयं स्थिरमजं हि तव स्वरूपम् ॥११॥

रुजा शरीरं जरया च तद्बलं,
यशश्च लोभेन यथा विनश्यति ।
तथा प्रमादैरखिलो गुणव्रज-
स्ततः सुखाय श्रयताच्च पौरुषम् ॥१२॥

ज्वरे निवृत्ते रुचिरेधते यथा,
मले गते शाम्यति जाठरी व्यथा ।
तथा प्रमादे विगतेऽभिवर्द्धते,
गुणोच्चयो दुर्बलता च नश्यति ॥१३॥

नो देशस्य समुन्नतिर्दृढतरैर्विप्रैर्वरैर्मीयते,
ना द्रव्यैर्न च दिव्य-हर्म्यनिकरैर्नाश्वैर्गजैः सैनिकैः ।

स्वान्योद्धारक-नीतिरीति-कुशलैः कर्तव्यनिष्ठैः सदा,
शान्ति-क्षान्ति-परायणैः सुपुरुषैर्देशोन्नतिर्मीयते ॥१४॥
विघ्नास्सन्ति हि तावदेव बलिनः कर्तव्य-संरोधकाः,
यावद् दुर्बलता मनःशिथिलता कर्तृ रुचेर्मन्दता।
चेदुत्सादयिनिश्चयो भयबलं जागर्ति हृन्मन्दिरे,
किं कर्तुं प्रभवन्ति दुर्बलतरा विघ्ना वराका इमे ॥१५॥

अभ्यास

१. ब्राह्मण तथा क्षत्रियों के हृदय में क्या अन्तर है ? बड़ों के अनुरोध से भी मनुष्य को कैसे वचन बोलने चाहिएँ ? कौन २ व्यक्ति जीवित या मरे के समान हैं ? सेवा-वृत्ति श्रेष्ठ है या श्ववृत्ति ?—इसपर अपने विचार प्रकट कीजिए। देशोन्नति का अनुमान किस प्रकार किया जाता है ?

२. वाचि, त्रपुणि, अहेः, वृद्धयै—इन शब्दों में विभक्ति बताओ। 'रुजा' में तृतीया, 'निवृत्ते' में सप्तमी विभक्ति क्यों प्रयुक्त हुई ?

३. 'सुपुरुषैर्देशोन्नतिर्मीयते' इसका वाच्य-परिवर्तन कीजिए।

४. 'श्रयतात्' इसमें लकार, पुरुष, वचन बतलाइए।

प्रह्लादोपाख्यानम्

शब्दार्थ

स्वायत्तीकृताः=वश किये थे। जातामर्षः=न सहन करता हुआ। निष्क्रास्यताम्=निकाल दो। तुतोद=कष्ट देता था। वित्थ=जानते हो। मोहयति=गलती कराता है। ऋते=बिना। श्मातः=भरा हुआ। सम्राट्=राजा।

पुरा दितेः सुतो महावीर्यो हिरण्यकशिपुर्नाम दैत्यकुलावतंसः सम्राट् पापाचारैः प्रजानां मनांसि तुतोद। तेन पूर्वजन्मकृततपसा ब्रह्मणो गृहीतवरेण सिद्धगन्धर्वपन्नगाः स्वायत्तीकृताः। सर्वं त्रैलोक्यं तस्य नाम्नोऽबिभेत्। तस्य राज्ये न कदापि रामकृष्णादीनां नामापि केनचिदश्राबि। सर्वत्र जगति सर्वो जनस्तमेव जगतः करणं कारणं कर्तारममन्यत।

तस्य पुत्रो महाभागः प्रह्लादाभिधानः पूर्वजन्म-संस्कारैः आस्तिकः सच्चरित्रः सुधीः धीमान् धार्मिको देवानां पूजकः रामप्रियः चासीत्।

'विषादमृतम् अमृताद् विषम्' इति न्यायोऽत्रैव घटते।

स च पञ्चवर्षो बालः शिक्षार्थं गुरुकुले प्रविष्टः छात्रावासे वसतिमलभत ।

तस्याचरणं शैशव एव प्रजाभीष्टं हितकरं चासीत् । प्रह्लादस्य आस्तिक्यप्रभावेण प्रभावितास्तस्य सहपाठिनः सहचराश्च तमेवानुसरन्ति स्म ।

न केवलं सर्वस्यां कक्षायां प्रत्युत सर्वत्र विद्यालये रामः शिवः शंकर इत्यादि-शब्दैर्गुरुभवनं प्रतिशब्दितमासीत् ।

एतद् वृत्तं नास्तिकस्य पापाचारिणः हिरण्यकशिपोः कर्णगोचरं गतम् ।

सक्रोधो रक्तलोचनो जातामर्षो दैत्यराजः तत्क्षणमेव पुत्रं तथा अन्यान् छात्रान् परीक्षितुं पाठालयं प्रति प्रतस्थे । पाठभवने तेन तथैवावगतं यथा श्रुतम् । गुरुणोक्तम्—"एष बालो न मम वाचमनुवदति, अपितु अन्यानपि बालकान् मोहयति ।

रामं जपति बालोऽयं केशवं च सदा हृदि ।
न शृणोति च मे वाचो मनसाऽयं कदाचन ॥

यतोऽदण्ड्यो राजपुत्रः, किं कुर्याम्, सर्वाणि साधनानि अस्य राजकुमारस्याध्यापने प्रयुक्तानि परं निष्फलतां

गतानि ।"

प्रह्लादः प्रोवाच—"प्रभो ! पित्रोः गुरुश्चाज्ञां सर्वथा मन्ये, परं मम हृदयस्थम् अनादिमध्यान्तम् अजम् अवृद्धिक्षयम् अच्युतं प्रभुं रामं सर्वकारणकारणं न विस्मरामि ।

एवं दैत्येन्द्रः क्रोधसंरक्तलोचनो गुरुं पुत्रं बालान् च प्रावोधयत्—"यूयं मां न वित्थ, मामवज्ञाय कस्यचिज्जीवनं क्षणमपि सुखं भवितुं नार्हति, मयि तिष्ठति युष्मासु को वक्तुं समुत्सहते, इदानीमेव तस्य जीवनान्तं विधास्यामि, त्रिषु लोकेषु न काचिदपि शक्तिर्यां मामवजानीयात् ।"

प्रह्लादः सोत्साहमुवाच—

शास्ता विष्णुरशेषस्य जगतो यो हृदि स्थितः ।
तमृते परमात्मानं तात ! कः केन शिष्यते ॥

हिरण्यकशिपुरुवाच—"कः शिवः शङ्करो विष्णुः प्रभवति मयि प्रभवति ।"

प्रह्लादः प्राह—"यः सर्वत्र व्याप्नोति विष्णुः स एव परमेश्वरः ।"

दैत्यराजः साभिमानमभाषत—"मय्यवस्थिते कोऽन्यः परमेश्वरसंज्ञः ? पुनः पुनर्ब्रवीषि यम्, अयं दुष्टो निष्क्राम्य-

ताम्, न कदाप्यस्य दर्शनं विधास्ये ।"

कालेऽतीतेऽसुरेश्वरः पुत्रप्रेम्णा प्रचोदितः तमाहूया-पृच्छत्—"गाथा काचिद् गीयताम् ।"

प्रह्लादो जगौ—

"कारणं सर्वलोकस्य स नो विष्णुः प्रसीदतु ।"

यथा घृतप्रक्षेपणेन अग्निः प्रवर्धते तथैव दैत्यराजः क्रोधाग्निनाध्मातः सर्पानाहूय आज्ञापयामास—"एनं दुराचारं दुर्मतिं सद्यो विषज्वालाकुलैर्वक्त्रैर्दशत हिंस्त च ।" एवं समाज्ञप्तास्ते सर्पाः सर्वथा तं हन्तुमयतन्त परं तेषां दंष्ट्रा विशीर्णा भग्नाश्च ।

सर्पा ऊचुः—

नास्य त्वचः स्वल्पमपीह भिन्नम् ।
प्रशाधि दैत्येश्वर कार्यमन्यत् ॥

हिरण्यकशिपुः वायुसहायमग्निं पुत्रं दग्धुमादिदेश, तावपि निष्फलौ यथागतं तथैव प्रतिन्यवर्तताम् ।

प्रह्लादः सविनयं प्राह—"तात पवनेरितो वह्निर्न मां दग्धुं क्षमः । अन्यदपि यत् ते रोचते मयि प्रहर, परं रामे रक्षति सर्वं निष्फलम् ।

तदा मन्त्रिणः पुरोहिताश्च भीताः कम्पमानास्तं

दानवराजं प्राहुः—"राजन् ! बाले वृद्धे स्त्रियां गुरौ पित्रोः दासे निर्धने च कोपः सदा नियम्यताम् ।"

तस्मिन्नेव क्षणे सशङ्खचक्रो भगवान् विष्णुः नरसिंहः स्तम्भात् प्रादुरभूत् ।

ततः पूर्वजन्मसुकृतप्रभावैः सुसंरक्षितः प्रह्लादो रामाराधन-तत्परो बह्वीर्दुर्घटनाः पारमेत्य प्रादुर्भूतं नरसिंहावतारं श्रीभगवन्तं जनक्लेशापहारकं श्रीराममस्तौत् ।

वयं त्वां स्मरामो वयं त्वां भजामो
वयं त्वां जगत्साक्षिरूपं नमामः ।
सदेकं कृपालुं नृसिंहावतारं
भवाम्भोधिपोतं शरण्यं व्रजामः ॥

तस्मिन्नेव क्षणे नरसिंहदेवो हिरण्यकशिपुं केशेषु गृहीत्वा नखैर्विदारितकुक्षिं खण्डशः कृतवान् ।

हिरण्यकशिपुं हत्वा नृसिंहः स्वरजीगमत् ।
क्रोधोऽपि महतां लोके जनानां हितकारकः ॥

अभ्यास

१. महावीर्यः । सर्वकारणकारणम् । नरसिंहदेवः । दैत्यराजः । क्रोधसंरक्तलोचनः । इन समस्त पदों का विग्रह करके समासों के नाम भी बताओ ।

२. प्रह्लाद के विषय में गुरु ने हिरण्यकशिपु से क्या कहा ?

३. पुत्र के सुधारने के लिए पिता ने क्या-क्या साधन लगाये ?

४. नमामः, अमन्यत, शृणोति, प्राह, विधास्ये—इन क्रियाओं के धातु, लकार, पुरुष और वचन लिखो।

५. गृहीत्वा, हत्वा, कृतवान्, गतम्, दशनम्—इनका परिचय दो।

चण्डरव-शृगालकथा

शब्दार्थ

क्षुधाविष्टः = भूखा । सारमेयाः = कुत्ते । प्रत्यासन्नम् = समीपवर्ती । नीलीरसपूर्णम् = नील से भरा हुआ । एको ग्रहः = जो ये ग्रहण करते हैं उसे नहीं छोड़ते । गरल = ज़हर । प्राज्ञाः = पण्डित । सन्त्रस्ताः = भयभीत । समादिश = आज्ञा दीजिए । व्यापाद्य = मारकर । तारस्वरम् = उच्चस्वर । वाहिताः = धोखे में डाले गये ।

त्यक्ताश्चाऽभ्यन्तरा येन बाह्याश्चाभ्यन्तरीकृताः ।
स एव मृत्युमाप्नोति मूर्खश्चण्डरवो यथा ॥

कस्मिंश्चिद्वनप्रदेशे चण्डरवो नाम शृगालः प्रतिवसति स्म । स कदाचित्क्षुधाविष्टो जिह्वालौल्यान्नगरान्तरेऽनुप्रविष्टः ।

अथ तं नगरवासिनः सारमेया अवलोक्य सर्वतः शब्दायमानाः परिधाव्य तीक्ष्णदंष्ट्राग्रैर्भक्षितुमारब्धाः । सोऽपि तैर्भक्ष्यमाणः प्राणभयात् प्रत्यासन्नं रजकगृहं प्रविष्टः, तत्र च नीलीरसपरिपूर्णं महाभाण्डं सञ्जीकृतमासीत् । तत्र सारमेयैराक्रान्तो भाण्डमध्ये पतितः । अथ यावन्निष्क्रान्तस्तावन्नीलवर्णः सञ्जातः । तत्राऽपरे

सारमेयास्तं शृगालमजानन्तो यथाऽभीष्टां दिशं जग्मुः ।

चण्डरवोऽपि दूरतरं प्रदेशमासाद्य काननाभिमुखं प्रतस्थे । न च नीलवर्णेन कदाचिन्निजरङ्गस्त्यज्यते । उक्तञ्च—

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोरपि ॥

अथ तं हरगलगरलतमालसमप्रभमपूर्वं सत्त्वमवलोक्य सर्वे सिंह-व्याघ्र-द्वीपि-वृक-वानरप्रभृतयोऽरण्यनिवासिनो भयव्याकुलचित्ताः समन्तात् पलायनक्रियां कुर्वन्ति । कथयन्ति च—न ज्ञायतेऽस्य कीदृग्विचेष्टितं पौरुषं च ? तद् दूरतरं गच्छामः । उक्तञ्च—

न यस्य चेष्टितं विद्यान्न कुलं न पराक्रमम् ।
न तस्य विश्वसेत् प्राज्ञो यदीच्छेच्छ्रियमात्मनः ॥

चण्डरवोऽपि तान्भयव्याकुलितान्विज्ञायेदमाह—भो भोः श्वापदाः ! किं यूयं मां दृष्ट्वैव सन्त्रस्ता व्रजथ ? तन्न भेतव्यम् । अहं ब्रह्मणाऽद्य स्वयमेव सृष्टाऽभिहितः—यच्छ्वापदानां मध्ये कश्चिद्राजा नास्ति, तत्त्वं मयाऽद्य सर्वश्वापदप्रभुत्वेऽभिषिक्तः ककुद्द्रुमाभिधः । ततो गत्वा क्षितितले तान्सर्वान्परिपालय, इति । ततोऽहमत्रागतः ।

तन्ममच्छत्रच्छायायां सर्वैरेव श्वापदैर्वर्तितव्यम् । अहं ककुद्द्रुमो नाम राजा त्रैलोक्येऽपि सञ्जातः । तच्छ्रुत्वा सिंहव्याघ्रपुरःसराः श्वापदाः—स्वामिन् ! प्रभो ! समादिश—इति वदन्तस्तं परिवव्रुः ।

अथ तेन सिंहस्याऽमात्यपदवी प्रदत्ता । व्याघ्रस्य शय्यापालत्वम् । द्वीपिनस्ताम्बूलाधिकारः । वृकस्य द्वारपालकत्वम् । ये चात्मीयाः शृगालास्तैः सहाऽऽलापमात्रमपि न करोति । शृगालाः सर्वेऽप्यर्धचन्द्रं दत्त्वा निःसारिताः ।

एवं तस्य राज्यक्रियायां वर्तमानस्य ते सिंहादयो मृगान् व्यापाद्य तत्पुरतः प्रक्षिपन्ति । सोऽपि प्रभुधर्मेण सर्वेषां प्रविभज्य तान् प्रयच्छति ।

एवं गच्छति काले कदाचित्तेन सभागतेन दूरदेशे शब्दायमानस्य शृगालवृन्दस्य कोलाहलोऽश्रावि । तं शब्दं श्रुत्वा पुलकिततनुरानन्दाश्रुपरिपूर्णनयन उत्थाय तारस्वरेण विरोतुमारब्धवान् ।

अथ ते सिंहादयस्तं तारस्वरमाकर्ण्य शृगालोऽयमिति मत्वा सलज्जमधोमुखाः क्षणमेकं स्थित्वा मिथः प्रोचुः—भोः ! वाहिता वयमनेन क्षुद्रशृगालेन ! तद्वध्यताम्—इति

सोऽपि तदाकर्ण्य पलायितुमिच्छंस्तत्र स्थान एव सिंहादिभिः खण्डशः कृतो मृतश्च ।

अभ्यास

१. शृगाल का नील वर्ण किस प्रकार हुआ ? उसे देखकर जंगली जानवर क्यों भागे ? उसने उनसे क्या कहा ? राजा बन कर शृगाल ने किस-किस पशु को किस-किस अधिकार पर लगाया ? शृगाल की पोल किस प्रकार खुली ? पोल खुलने पर सिंहादिक ने उसके साथ कैसा बर्ताव किया ? इस कथा से क्या शिक्षा मिलती है ?

२. उपसर्ग किसे कहते हैं ? उपसर्ग धातु के आदि में लगाया जाता है या अन्त में ? सञ्जातः, अभिषिक्तः, विश्वसेत्—इनमें से उपसर्ग पृथक् करो ।

३. प्रकृति-प्रत्यय पृथक्करण कीजिए—

वर्तितव्यम्, गत्वा ।

४. समासों के नाम लिखिए तथा विग्रह कीजिए—

प्राणभयात् । महाभाण्डम् । हरगलगरलतमालसमप्रभम् । सर्वश्वापदप्रभुत्वे ।

५. सह के योग में कौन-सी विभक्ति आती है ?

प्रहेलिका

शब्दार्थ

अपदः = पैरों से रहित। साक्षरः = अक्षरों से युक्त, पढ़ा-लिखा। अमुखः = मुख रहित। स्फुटवक्ता = साफ़ कहने वाला। रविजा = रई, सूर्य से पैदा हुई। वन = जल। कृष्णानना = काले मुँह वाली। मार्जारी = बिल्ली। पाञ्चाली = द्रौपदी।

अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥

लेखपत्रम् ॥१॥

रविजा, शशिकुन्दाभा तापहारी जगत्प्रिया।
वर्द्धते वनसंगेन न तापी यमुनापि नो॥

तक्रम् ॥२॥

एकचक्षुर्न काकोऽयं विलमिच्छन्न पन्नगः।
क्षीयते वर्द्धते चैव न समुद्रो न चन्द्रमाः॥

सूचिका ॥३॥

पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः।
चलते वायुवेगेन पदमेकं न गच्छति॥

कुलालचक्रदण्डौ ॥४॥

कृष्णानना न मार्जारी द्विजिह्वा न च सर्पिणी ।
पञ्चभर्त्री न पाञ्चाली यो जानाति स पण्डितः ॥
लेखनी ॥५॥

अभ्यास

१. प्रहेलिका किसे कहते हैं ? तीसरी पहेली का अर्थ स्पष्ट कीजिए ।

२. रूप लिखिए—

दूरगामी (पञ्चमी), स्फुटवक्ता (षष्ठी), एकचक्षुः (सप्तमी) ।

३. समास किसे कहते हैं, उसके कितने भेद हैं ?

रावणाय श्रीपवनतनयकृतोपदेशः

शब्दार्थ

विवेकतः=ज्ञान से। उपैहि=ग्रहण करो। संभवः=उत्पत्ति। स्वपतः=सोते हुए। अद्वयत्वतः=अद्वितीय होने से। सूक्ष्मकः=सूक्ष्म होने से। चिन्मात्रम्=चैतन्यस्वरूप। व्यतिरिक्त=पृथक्, अलहदा। परमं पदम्=मोक्ष, वैकुण्ठप्राप्ति। मौर्ख्यम्=मूर्खता। भवाम्बुधेः=संसार रूपी समुद्र के।

विचार्य लोकस्य विवेकतो गतिं,
न राक्षसीं बुद्धिमुपैहि रावण!
दैवीं गतिं संसृतिमोक्षहैतुकीं,
समाश्रयात्यन्तहिताय देहिनः ॥१॥

त्वं ब्राह्मणो ह्युत्तमवंशसम्भवः,
पौलस्त्यपुत्रोऽसि कुबेरबान्धवः।
देहात्मबुद्ध्यापि च पश्य राक्षसे-
नास्यात्मबुद्ध्या किमु राक्षसो नहि ॥२॥

शरीरबुद्धीन्द्रियदुःखसन्तति-
र्न ते न च त्वं तव निर्विकारतः।

अज्ञानहेतोश्च तथैव सन्तते-
रसत्वमस्याः स्वपतो हि दृश्यवत् ॥३॥
इदं तु सत्यं तव नास्ति विक्रिया,
विकारहेतुर्न च तेऽद्वयत्वतः ।
यथा नभः सर्वगतं न लिप्यते,
तथा भवान् देहगतोऽपि सूक्ष्मकः ॥४॥
देहेन्द्रियप्राणशरीरसङ्गत-
स्त्वात्मेति बुद्ध्याखिलबन्धभाग्भवेत् ।
चिन्मात्रमेवाहमजोऽहमक्षरो
ह्यानन्दभावोऽहमिति प्रमुच्यते ॥५॥
देहोऽप्यनात्मा पृथिवीविकारजो,
न प्राण आत्मानिल एष एव नः ।
मनोऽप्यहङ्कार विकार एव नो,
न चापि बुद्धिः प्रकृतेर्विकारजा ॥६॥
आत्मा चिदानन्दमथो विकारवान्,
देहादिसङ्गाद् व्यतिरिक्त ईश्वरः ।
निरञ्जनो मुक्त उपाधितः सदा,
ज्ञात्वैवमात्मानमितो विमुच्यते ॥७॥

अतोऽहमात्यन्तिकमोक्षसाधनं ,
वक्ष्ये शृणुष्वावहितो महामते !
विष्णोर्हि भक्तिः सुविशोधनं धिय-
स्ततो भवेज्ज्ञानमतीव निर्मलम् ॥८॥
विशुद्धतत्त्वानुभवो भवेत्ततः ,
सम्यग्विदित्वा परमं पदं व्रजेत् ।
अतो भजस्वाद्य हरिं रमापतिं,
रामं पुराणं प्रकृतेः परं विभुम् ॥९॥
विसृज्य मौर्ख्यं हृदि शत्रुभावनां,
भजस्व रामं शरणागतप्रियम् ।
सीतां पुरस्कृत्य सपुत्रबान्धवो,
रामं नमस्कृत्य विमुच्यसे भयात् ॥१०॥
रामं परात्मानमभावयज्जनो
भक्त्या हृदिस्थं सुखरूपमद्वयम् ।
कथं परं तीरमवाप्नुयाज्जनो
भवाम्बुधेर्दुःखतरङ्गमालिनः ॥११॥
नोचेत्त्वमज्ञानमयेन वह्निना
ज्वलन्तमात्मानमरक्षितारिवत् ।

नयस्यधोऽधः स्वकृतैश्च पातकै-
र्विमोक्षशङ्का न च ते भविष्यति ॥१२॥

अभ्यास

१. श्री हनुमान् जी ने यह उपदेश रावण को कब दिया था ?

२. इस उपदेश का सारांश अपनी भाषा में लिखिए।

३. आत्यन्तिक मोक्ष-साधन किसे कहते हैं, वह कौन-सा है ?

४. सन्धिविच्छेद करिए, और नियम भी लिखिए—

उपैहि, पुत्रोऽसि, त्वात्मेति, एष एव।

५. निम्नलिखित पदों में विग्रह सहित समास लिखिए—

कुबेरबान्धवः। शरीरबुद्धीन्द्रियदुःखसन्ततिः। विशुद्धतत्त्वानुभवः। शरणागतप्रियम्। भवाम्बुधेः।

६. प्रकृति-प्रत्यय विश्लेषण कीजिए—

भक्तिः, विकारतः, स्वपतः, बुद्ध्वा।

कौटिल्यः

शब्दार्थ

अभिभवितुम्=पराजय करने को । भुजगीम्=साँपिन को । वेत्रासन=बेंत की कुर्सी । सन्धाय=मेल-मिलाप करके । वृषलम्=चन्द्रगुप्त से । अवसितप्रतिज्ञाभारोऽपि=प्रतिज्ञा का बोझा समाप्त कर देने पर भी । उत्खातम्=नष्ट कर दिया । प्रलयेऽपि=नष्ट होने पर भी । शयानेन=सोते हुए, असावधानता के साथ । अभिव्यक्तये=प्रकट करने के लिए । जिज्ञासया=जानने की इच्छा से । अन्विष्यते=ढूँढा जाता है । अप्रमादिनः=सावधान । औशनस्याम्=शुक्र-रचित । विश्रम्भः=विश्वास ।

(ततः प्रविशति मुक्तां शिखां परामृशन् कुपितश्चाणक्यः)

चाणक्यः—क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति ? नन्दकुलकालभुजगीं मे शिखां को वध्योऽद्यापि वध्यमानां नेच्छति । शार्ङ्गरव ! शार्ङ्गरव !!

(प्रविश्य)

शिष्यः—उपाध्याय ! उपाध्याय !!

चाणक्यः—वत्स ! उपवेष्टुमिच्छामि ।

शिष्यः—उपाध्याय ! नन्विदं सन्निहितवेत्रासनैव

द्वारप्रकोष्ठशाला । तदस्यामुपवेष्टुमर्हत्युपाध्यायः ।

चाणक्यः—वत्स ! कार्याभिनियोग एवास्मान् व्याकुल-सति न पुनरुपाध्यायसहभूः शिष्यजने दुःशीलता (नाट्ये-नोपविश्यात्मगतम्) कथं प्रकाशतां गतोऽयमर्थः पौरेषु यथा किल नन्दकुलविनाशजनितरोषो राक्षसः पितृवधाम-र्षितेन सकलनन्दराज्य-परिपणन-प्रोत्साहितेन पर्वतकपुत्रेण मलयकेतुना सह सन्धाय तदुपगृहीतेन च महता म्लेच्छ-राजबलेन परिवृतो वृषलमभियोक्तुमुद्यत इति । (विचिन्त्य) अथवा येन मया सर्वलोकप्रकाशं नन्दवंशवधं प्रतिज्ञाय निस्तीर्णा दुस्तरा प्रतिज्ञासरित् सोऽहमिदानीं प्रकाशीभवन्त-मप्येनमर्थं न समर्थः किं प्रशमयितुम् ? इदानीमव-सितप्रतिज्ञाभारोऽप्यहं वृषलापेक्षया शस्त्रं धारयामि । येन मया—

समुत्खाता नन्दा नवहृदयरोगा इव भुवः,
कृता मौर्ये लक्ष्मीः सरसि नलिनीव स्थिरपदा ।
द्वयोः सारं तुल्यं द्वितयमभियुक्तेन मनसा,
फलं कोपप्रीत्योर्द्विषति च विभक्तं सुहृदि च ॥१॥

अथवा गृहीते राक्षसे किमुत्खातं नन्दवंशस्य किंवा

स्थैर्यमुत्पादितं चन्द्रगुप्तलक्ष्म्याः। (विचिन्त्य) अहो राक्षसस्य नन्दवंशे निरतिशयो भक्तिगुणः। स खलु कस्मिंश्चिदपि जीवति नन्दान्वयावयवे वृषलस्य साचिव्यं ग्राहयितुं न शक्यते। (प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा) साधु अमात्य राक्षस! साधु। साधु श्रोत्रिय! साधु। साधु मंत्रिबृहस्पते! साधु। दुर्लभास्त्वादृशाः कृतिनो ये भर्तुः प्रलयेऽपि भक्त्या कार्यधुरं वहन्ति। अत एवास्माकं त्वत्संग्रहे यत्नः कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति।

तन्मयाप्यस्मिन् वस्तुनि न शयानेन स्थीयते। यथाशक्ति क्रियते तद्ग्रहणं प्रति यत्नः। कथमिव? अत्र तावद् वृषलपर्वतकयोरन्यतरविनाशेनापि चाणक्यस्यापकृतं भवतीति विषकन्यया राक्षसेनास्माकमत्यन्तोपकारि मित्रं घातितस्तपस्वी पर्वतक इति संचारितो जगति जनापवादः। लोकप्रत्ययार्थमस्यैवार्थस्याभिव्यक्तयेऽपि ताते चाणक्येन घातित इति रहसि त्रासयित्वा भागुरायणेनापवाहितः पर्वतकपुत्रो मलयकेतुः। शक्यः खल्वेष राक्षसेनातिपरिगृहीतोऽपि व्युत्तिष्ठमानः प्रज्ञया निग्रहीतुं पुनरस्य निग्रहात् पर्वतकवधोत्पन्नं राक्षस्यायशः प्रकाशीभवत्प्रमार्ष्टु-

मिच्छामि । प्रयुक्ताश्च स्वपक्षपरपक्षयोरनुरक्तापररक्तजन-जिज्ञासया बहुविधदेशवेषभाषाचारवेदिनो नानाव्यञ्जनाः प्रणिधयः । अन्विष्यते च कुसुमपुरवासिनां नन्दामात्य-सुहृदां निपुणं प्रचारगतम् । तत्तत्कारणमुत्पाद्य कृतकृत्य-तामापादिताश्चन्द्रगुप्तसहोत्थायिनो भद्रभटप्रभृतयः प्रधान-पुरुषाः । शत्रुप्रयुक्तानां तीक्ष्णरसदायिनां प्रतिविधानं प्रत्यप्रमादिनः परीक्षितभक्तयः क्षितिपति-प्रत्यासन्ना नियोजितास्तत्र तत्राप्तपुरुषाः । अस्ति चास्माकं सहाध्या-यिमित्रमिन्दुशर्मा नाम ब्राह्मणः । स चौशनस्यां दण्ड-नीत्यां चतुष्षष्टयङ्गे ज्योतिःशास्त्रे च परं प्रावीण्यमुपगतः । स मया क्षपणकलिङ्गधारी नन्दवंशवधप्रतिज्ञानन्तरमेव कुसुमपुरमानीय सर्वनन्दामात्यैः सह सख्यं ग्राहितो विशेष-तश्च तस्मिन् राक्षसः समुत्पन्नविश्रम्भः । तेनेदानीं महत्प्रयो-जनमनुष्ठेयं भविष्यति । तदेवमस्मत्तो न किञ्चित् परि-हास्यते । वृषल एव केवलं प्रधानप्रकृतिरस्माभिरारोपित-राज्यतन्त्रभारः सततमुदास्ते । अथवा यत्स्वयमभि-योगदुःखैरसाधारणैरपाकृतं तदेव राज्यं सुखयति । कुतः—

स्वयमाहृत्य भुञ्जाना बलिनोऽपि स्वभावतः ।
गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ॥२॥

अभ्यास

१. राक्षस कौन था ? चाणक्य इसे क्यों मिलाना चाहता था ? चाणक्य की क्या प्रतिज्ञा थी ? वह उसने किस प्रकार पूरी की ? इन्दु शर्मा कौन था ? चन्द्रगुप्त को मौर्य या वृषल क्यों कहते हैं ?

२. अव्यय किसे कहते हैं ?

३. रूप लिखिए—

भर्तृ (चतुर्थी), इदम् (स्त्रीलिङ्ग में पंचमी), युष्मद् (षष्ठी), और अस्मद् शब्द के वैकल्पिक रूप लिखिए।

४. निम्नलिखित रूप किस धातु के किस लकार में, किस पुरुष के किस वचन में हैं ?

स्थीयते, अर्हति, उद्यते, वहन्ति ।

५. त्वा तथा ल्यप् प्रत्यय किस अर्थ में कब होते हैं ?

पुत्रविजयः

शब्दार्थ

अमात्य = मंत्री। कल्याणी = भला करने वाली। सप्राभृतकः = भेंट सहित। उद्वेष्टयति = खोलता है। यज्ञशरणात् = यज्ञशाला से। परिष्वज्य = आलिंगन करके। निरर्गलः = बेरुकावट। रोधसि = किनारे पर। सम्मर्दः = युद्ध। यक्ष्ये = यज्ञ करूँगा। वीरसूः = वीर को पैदा करने वाली।

(प्रविश्य)

कञ्चुकी—विजयतां देवः। देव अमात्यो विज्ञापयति कल्याणी देवस्य बुद्धिः, मंत्रिपरिषदोऽप्येवमेव दर्शनम्। कुतः—

द्विधा विभक्तां श्रियमुद्वहन्तौ धुरं रथाश्वाविव संग्रहीतुः।
तौ स्थास्यतस्ते नृपती निदेशे परस्परावग्रहनिर्विकारौ॥

राजा—तेन हि मन्त्रिपरिषदं ब्रूहि सेनापतये वीरसेनाय लिख्यतामेवं क्रियताम्।

कञ्चुकी—यदाज्ञापयति देवः (इति निष्क्रम्य सप्राभृतकं लेखं गृहीत्वा पुनः प्रविष्टः) अनुष्ठिता प्रभोराज्ञा।

अयं पुनरिदानीं देवस्य सेनापतेः पुष्यमित्रस्य सकाशात्स-प्राभृतको लेखः प्राप्तः प्रत्यक्षीकरोत्वेनं देवः ।

(राजा सहसोत्थाय सोपचारं गृहीत्वा प्राभृतकम्)

(परिजनायार्पयति लेखं च नाट्ये नोद्वेष्टयति)

देवी—(आत्मगतम्) अहो ततो सुखमेव नो हृदयम् । श्रोष्यामि तावद् गुरुजनस्य कुशलानन्तरं वसुमित्रस्य वृत्तान्तम् । अधिकारे खलु मे पुत्रकः सेनापतिना नियुक्तः ।

राजा—(उपविश्य वाचयति) स्वस्ति यज्ञशरणात्सेनापतिः पुष्यमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात् परिष्वज्यानुदर्शयति । विदितमस्तु । योऽसौ राजयज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य संवत्सरोपावर्तनीयो निरर्गलस्तुरगो विसृष्टः, स सिन्धोर्दक्षिणरोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः । तत उभयोः सेनयोर्महानासीत्सम्मर्दः ।

(देवी विषादं नाटयति)

राजा—कथमीदृशं संवृत्तम् (शेषं पुनर्वाचयति)

ततः परान् पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥

देवी—अनेनाश्वस्तं मे हृदयम् ।

राजा—(लेखशेषं वाचयति) सोऽहमिदानीमंशुमतेव सागरः पौत्रेण प्रत्याहृताश्वो यज्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति ।

राजा—अनुगृहीतोऽस्मि ।

परिव्राजिका—दिष्ट्या पुत्रविजयेन दम्पती वर्धेते । (देवीं विलोक्य)

भर्त्रासि वीरपत्नीनां श्लाघ्यानां स्थापिता धुरि ।
वीरसूरिति शब्दोऽयं तनयाच्चामुपस्थितः ॥

विदूषकः—भवति ! परितुष्टोऽस्मि यत् पितरमनुगतो वत्सः ।

परिव्राजिका—कलभेन खलु यूथपतिरनुकृतः ।

कञ्चुकी—देव ! अयं कुमारः ।

नैतावता वीरविजृम्भितेन चित्तस्य नो विस्मयमादधाति ।
यस्याः प्रधृष्यः प्रभवस्त्वमुच्चैरग्नेरपां दग्धुरिवोरुजन्मा ॥

राजा—मौद्गल्य ! यज्ञसेनश्यालमूरीकृत्य मुच्यन्तां सर्वे बन्धनस्थाः ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः)

अभ्यास

१. मन्त्री के साथ राजा का व्यवहार कैसा होना चाहिए ? सगर कौन था ? अंशुमान् ने किस प्रकार घोड़ा लाकर उसे समर्पण किया ? अश्वमेध यज्ञ से तुम क्या समझते हो ?

२. प्रकृति-प्रत्यय विश्लेषण कीजिए—

उद्वहन्तौ, निष्क्रम्य, उत्थाय, नियुक्तः, विसृष्टः, उपावर्तनीयः, गोप्तारम् ।

३. सन्धिविच्छेद कीजिए—चरन्नश्वानीकेन, सोपचारम्, सोऽहम् ।

दुष्यन्तस्य स्वपुत्रावाप्तिः

शब्दार्थ

चापलम् = चंचलता। अभूमिः = अयोग्य। प्रक्रीडितुम् = खेलने के लिए। जृम्भस्व = मुँह फैला। विप्रकरोषि = सताता है। संरम्भः = साहस। केसरिणी = सिंहनी। क्रीडनकम् = खिलौना। दुर्मोकहस्त-ग्रहेण = जिसके हाथ से कठिनता से छुड़ाया जा सकता है। प्रत्ययात् = विश्वास से। संवादिन्याकृतिः = समान आकृति। अन्वय = वंश। शकुन्त = पक्षी। रम्यत्वम् = सुन्दरता। रक्षा-करण्डकम् = रक्षा-सूत्र। विक्रिया = विकार।

(नेपथ्ये)

मा खलु चापलं कुरु, कथं गत एवात्मनः प्रकृतिम्।

राजा—(कर्णं दत्वा) अभूमिरियमविनयस्य, को नु खल्वेष निषिध्यते (शब्दानुसारेणावलोक्य, सविस्मयम्) अये! को नु खल्वयमनुवध्यमानस्तपस्वीभ्यामबालसत्त्वो बालः?

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥१॥

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां बालः)

बालः—जृम्भस्व सिंह, दन्ताँस्ते गणयिष्ये ।

प्रथमा तपस्विनी—अविनीत ! किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि । हन्त, वर्द्धते तव संरम्भः । स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि ।

राजा—किन्नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः । नूनमनपत्यता मां वत्सलयति ।

द्वितीया तपस्विनी—एषा खलु केसरिणी त्वां लंघयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि ।

बालः—अहो बलीयः खलु भीतोऽस्मि (इत्यधरं दर्शयति) ।

राजा—महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।

स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः ॥२॥

प्रथमा तपस्विनी—वत्स ! एनं बालमृगेन्द्रं मुञ्च, अपरं ते क्रीडनकं दास्यामि ।

बालः—कुत्र, देह्येतत् (हस्तं प्रसारयति) ।

द्वितीया तपस्विनी—सुव्रते ! न शक्य एष वाचामात्रेण विरमयितुम् । गच्छ, त्वम् । मदीयोटजे मार्कण्डेयस्यर्षि-

कुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति तमस्योपहर ।

प्रथमा तपस्विनी—तथा (इति निष्क्रान्ता) ।

बालः—अनेनैव तावत् क्रीडिष्यामि (तापसीं विलोक्य हसति) ।

तापसी—भवतु न मामयं गणयति । (पार्श्वगवलोकयति) कोऽत्र ऋषिकुमाराणाम् ? (राजानमवलोक्य) भद्रमुख ! एहि तावत् मोचयानेन दुर्मोकहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम् ।

राजा—(उपगम्य, सस्मितम्) अयि भो महर्षिपुत्र !

एवमाश्रमविरुद्धवृत्तिना,
संयमः किमिति जन्मतस्त्वया ।
सच्चसंश्रयसुखोऽपि दूष्यते,
कृष्णसर्पशिशुनेव चन्दनम् ॥३॥

तापसी—भद्रमुख ! न खल्वयमृषिकुमारः ।

राजा—आकारसदृशं चेष्टितमेवास्य कथयति, स्थानप्रत्ययात्तु वयमेवं तर्किणः (यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य आत्मगतम्)—

अनेन कस्यापि कुलांकुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्याद्यस्यायमङ्कात्कृतिना प्ररूढः ॥४॥

तापसी—आश्चर्यमाश्चर्यम् !

राजा—आर्ये, किमिव ?

तापसी—अस्य बालस्य तेऽपि संवादिन्याकृतिरिति विस्मायितास्मि । अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति ।

राजा—(बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः ।

तापसी—पुरुवंशः ।

राजा—(आत्मगतम्) कथमेकान्वयो मम ? अतः खलु मदनुकारिणमेनमत्रभवती मन्यते । (प्रकाशम्) न पुनरात्मगत्या मानुषाणामेष विषयः ।

तापसी—यथा भद्रमुखो भणत्यप्सरसः सम्बन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता ।

राजा—(अपवार्य) हन्त द्वितीयमिदमाशाजननम् ।

(ततः प्रविशति मृन्मयूरहस्ता द्वितीया तपस्विनी)

तापसी—सर्वदमन ! शकुन्तलावण्यं प्रेक्षस्व ।

बालः—कुत्र वा मम माता ?

उभे—नामसादृश्येन वञ्चितो मातृवत्सलः ।

द्वितीया तपस्विनी—वत्स ! अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि ।

राजा—(आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या ? सन्ति पुनर्नामधेयसादृश्यानि, अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते ।

बालः—मात एष भद्रमयूरो मे रोचते (क्रीडनकमादत्ते) ।

प्रथमा तपस्विनी—(विलोक्य, सोद्वेगम्) अहो रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते ।

राजा—अलमलमावेगेन । नन्विदमस्य सिंहशावविमर्दात् परिभ्रष्टम् (इत्यादातुमिच्छति) ।

उभे—मा खल्विदमवलम्बय । कथं गृहीतमनेन ? (विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः) ।

राजा—किमर्थं प्रतिषिद्धाः स्मः ?

प्रथमा—शृणोतु महाराजः, एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल

मातापितरावात्मानञ्च वर्जयित्वा परो भूमिपतितां न गृह्णाति ।

राजा—अथ गृह्णाति ?

प्रथमा—ततस्तं सर्पो भूत्वा दशति ।

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ?

उभे—अनेकशः ।

राजा—(सहर्षम्, आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि (इति बालं परिष्वजते) ।

अभ्यास

१. 'सर्वनाम' शब्द का क्या अर्थ है ? बालक की वीरता का वर्णन अपनी भाषा में लिखिए । दुष्यन्त वन में क्यों गया था ? उसने बालक को देखकर क्या-क्या विचार किये ? रक्षासूत्र उठाने के लिए राजा को क्यों मना किया गया ? शकुन्तला का परिचय लिखिए ।

२. समास विग्रह-सहित लिखिए—
यथाभ्यर्थितम्, सिंहशावविमर्दात् ।

३. 'रोचते' के योग में कौन-सी विभक्ति आती है ?

४. कर्तृवाच्य से कर्मवाच्य बदलने में किन-किन बातों पर ध्यान देना चाहिए—उदाहरण द्वारा स्पष्ट कीजिए ।

रावणाङ्गदसंलापः

शब्दार्थ

समधिगम्य=पाकर । तूष्णीम्=चुपचाप । जडमते=मूर्ख । वज्रिणः=इन्द्र की । अरल्लकः=माथे में लगा हुआ सौभाग्य-चिन्ह (सिंदूर) । दहन=अग्नि । व्रीडा=लाज । अब्धिम्=समुद्र को । दौत्य=दूत-सम्बन्धी कार्य । भ्रान्तः=घूमा । द्युमणिसुत-पुरम्=यमलोक को । कटुप्रलापिन्=कड़ुवा बोलने वाला । पन्नगी=सर्पिणी । सहस्रकिरणम्=सूर्य को । समीर=हवा । हुतवहम्=अग्नि को । त्रपामहे=लज्जित होते हैं । चपेट=चांटे । संगर=युद्ध ।

(श्रीरामाज्ञां समधिगम्य रावणसभायामङ्गदः प्रविशति ।)

प्रतिहारी—

ब्रह्मन्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयताम्,
स्वल्पं जल्प बृहस्पते जडमते नैषा सभा वज्रिणः ।
स्तोत्रं संहर नारद - स्तुतिकथालापैरलं तुम्बुरो !
सीतारल्लकभल्लभग्नहृदयः स्वस्थो न लङ्केश्वरः ॥१॥

(ततः प्रविशति प्रहस्तेन सहाङ्गदः। आकाशे लक्ष्यं बद्ध्वा)

रे राक्षसाः! कथयत क्व स रावणाख्यो
रत्नं रवीन्दुकुलयोरपहृत्य नष्टः।
त्रैलोक्यदीपनकरत्रिशिखाकराले,
यो रामनामदहने भविता पतङ्गः ॥२॥

रावणः—कस्त्वं वानर! रामराजभवने लेख्यार्थसंवाहको,
यातः कुत्र पुरा गतः हनुमान्निर्दग्धलंकापुरः।

अङ्गदः—(साधिक्षेपम्)

बद्धो राक्षसहनुमेति कपिभिः संताडितस्तर्जितः,
सव्रीडार्तिपराभवो वनमृगः कुत्रेति न ज्ञायते ॥३॥
यो लङ्कां समदीदहत्तव सुतं रक्षांसि चापीपिषत्,
यः कौशल्यमवीवदज्जनकजामब्धिं तथातीतरत्।
यश्चाराममभूमुटत्स हनुमानस्मत्प्रवीरोद्यमे,
दूराक्रामणदौत्य एव न पुनर्योद्धुं समादिश्यते ॥४॥

कृत्वा कक्षागतं त्वां कपिकुलतिलको वालिनामा बलीयान्,
भ्रान्तः सप्ताब्धितीरे क्षणमिव चरितं स्नानसन्ध्यार्चनं च।
बाणेनैकेन येनाहत इति पतितो वानरव्रीडयैव,
त्यक्त्वा सोऽपि प्रगर्वं द्युमणिसुतपुरं मुञ्च लङ्केश गर्वम् ॥५॥

रावणः—(सक्रोधम्)—

कुतो हन्तारण्ये कनकमृगमात्रं तृणचरं,
कुतो वृक्षाद् वृक्षप्लवननिपुणो वालिनिहतः ।
कुतो वह्निज्वालाजटिलशरसन्धानसुदृढ-
स्त्वहं युद्धोद्योगी गगनमधितिष्ठेन्द्रविजयी ॥६॥

अङ्गदः—

अवेहि मां रावण रामदूतं बाणा यदीया खरदूषणैणम् ।
भुक्त्वा तृषार्ता इवशोणितांभः
पास्यन्ति ते कण्ठघटैः सरन्ध्रैः ॥७॥

रावणः—वानराधम कटुप्रलापिन् ! पश्य—

मृत्युः पादान्तभृत्यस्तदपि दिनकरो मन्दमन्दं ममाग्रे-
ऽप्यष्टौ ते लोकपाला मम भयचकिता पादरेणुं ववन्दुः ।
दृष्ट्वा तं चन्द्रहासं स्रवति सुरवधूपन्नगीनां च गर्भो
निर्लज्जौ तापसौ तौ कथमिह भवतो वानरान्मेलयित्वा ॥८॥

अपरं च—

इन्द्रं माल्यकरं सहस्रकिरणं द्वारप्रतीहारकं,
चन्द्रं छत्रधरं समीरवरुणौ संमार्जयन्तौ गृहान् ।
पाचक्ये परिनिष्ठितं हुतवहं किं मद्गृहे नेक्षसे,
रक्षोभक्ष्यमनुष्यमात्रवपुषं तं राघवं स्तौषि किम् ॥९॥

अङ्गदः—

रे रे रावण रावणाः कति बहूनेतान् वयं शुश्रुमः,
प्रागेकं किल कार्तवीर्य-नृपतेर्दोर्दण्डपिण्डीकृतम् ।
एकं नर्तनदापिताञ्चकवलं दैत्येन्द्र - दासीगणै-
रन्यं वक्तुमपि त्रपामह इति त्वं तेषु कोऽन्योऽथवा ॥१०॥

रावणः—रे रे शाखामृग ! त्वामहं धर्मशीलतया कटु-प्रलापिनमपि न हन्मि, उक्तं च—

यथोक्तवादी दूतः स्यान्न स वध्यो महीभुजा ।

अङ्गदः—(सवैदग्ध्यम्)

परदारापहरणे न श्रुता या दशानन ।
दृष्टा दूतपरित्राणे साधोस्ते धर्मशीलता ॥११॥

किं बहुनालापेन—

सीतां मुञ्च भजस्व रामचरणं राज्यं चिराद् भुज्यतां,
देवाः सन्तु हविर्भुजः परिभवं मा यातु लङ्कापुरी ।
नोचेद्वानरवाहिनीपतिमहाचञ्चच्चपेटोत्तरै-
स्तत्तन्मुष्टिभिरङ्गसङ्गरगतस्तत्तत्फलं लप्स्यसे ॥१२॥

(इति बहुभिः प्रकारैर्लङ्काभटमुत्कटवाक्यैरधिक्षिप्य लङ्कामातङ्कयन्नङ्गदो निष्क्रान्तः) ।

अभ्यास

१. रावण का वीरत्व कवि ने किस प्रकार प्रदर्शित किया है ? संक्षेप में लिखिए। श्री हनुमान् जी के बल का वर्णन करते हुए अङ्गद ने उनके विषय में क्या कहा है ? "रे रे रावण रावणाः कति बहूनेतान् वयं शुश्रुमः" इस श्लोक में जिन-जिन कथाओं पर संकेत किया है—उन्हें लिखिए।

२. "सह" के तथा 'नमः' के योग में कौन-सी विभक्ति का प्रयोग होता है ? क्त प्रत्यय तथा क्तवतु प्रत्यय किन धातुओं के साथ होते हैं ?

३. शानच् तथा शतृ प्रत्यय में क्या अन्तर है ?

४. लोट् तथा विधिलिङ का प्रयोग कहाँ होता है ?

हिमवन्नगर-शोभादिवर्णनम्

शब्दार्थ

कुलाचल=पर्वत । पूर्वेद्युः=पहिले दिन । प्रहिताः=भेजे हुए । पौराः=पुरवासी । नियोगम्=आज्ञा । पटीर=सुगन्धित द्रव्य । वीथयः=गलियाँ । परिणय=विवाह । रम्भा=केला । मुरजाः=मृदंग, नक्कारे । शतमन्यु=इन्द्र । द्युमणि=सूर्य । चन्द्रार्धचूडामणिः=श्रीशङ्कर । पुरपरिष्कारः=नगर की सजावट । योक्त्रीभूत=मथने की रस्सी । व्योमनि=आकाश में । आतोद्य=बाजे । ज्योत्स्ना=चाँदनी ।

कञ्चुकी—आज्ञप्तोऽस्मि सकलकुलाचलचक्रवर्तिना हिमवता यथा—शिलाधर ! पूर्वेद्युरेव परमेश्वरप्रहिताः सारन्धतोकाः सप्तर्षयः समागत्य लब्धवराया वत्साया दिनमिदं विवाहमङ्गलयोग्यमकल्पयन् । तद्भवता चौषधिप्रस्थवासिनः पौराः परं परिष्क्रियतामिति नियोक्तव्या इति । तत् प्रभोर्नियोगमनुतिष्ठामि । (इति परिक्रम्य सर्वतो विलोक्य) भो भोः पौराः—

सन्नह्यन्तां विचित्राः प्रतिभवनमिह श्रेणयस्तोरणाना-
मुन्नीयन्तां समन्ताद्गगनतललिहः केतनानां पताकाः ।
संसिच्यन्तां पटीरद्रवभरितजलैर्वीथयो मुक्तपुष्पाः,
संप्राप्तोऽसावुमायाः परिणयदिवसो विश्वमाङ्गल्यहेतुः ॥१॥

(आकाशे) किं ब्रूथ ? भगवद्वचनात्प्रागेव सर्वमस्मा-
भिर्द्विगुणमाचरितमिति । (सर्वतो निर्वर्ण्य सहर्षम्)
अहो अस्मदादेशात्प्रागेव प्रवृत्तमहोत्सवन्नगरम् ! तथाहि—

एषा चन्दनमालिका विरचिता चाम्रप्रवालैर्नवैः,
रम्भास्तम्भपरिष्कृतेषु भवनद्वारेषु संलक्ष्यते ।
आमन्द्रध्वनयः क्वणन्ति मुरजा मूर्छन्ति तन्त्रीस्वराः,
शिञ्जानैर्मणिभूषणैस्तत इतो नृत्यन्ति वाराङ्गनाः ॥२॥

इतश्च—

उत्सर्पदागुरवधूपपरम्पराभिः,
प्रादुर्भवत्यभिनवो जलदागमोऽयम् ।
उन्नद्धतोरणमणिप्रभया स्फुरन्त्या,
सञ्जायते च शतमन्युशरासनश्रीः ॥३॥

अन्यतश्चामूः—

धवलारुणमेचकैरपाङ्गैरपि रामा रचयन्ति रङ्गवल्लीः ।
कुचयोर्युगलेन पूर्णकुम्भात् पुनरुक्तानिव कुर्वते मृगाक्ष्यः ॥३॥

सर्वतोऽवलोक्य—

विक्षिप्तः सरभसमेष पौरलोकै-
र्विस्फूर्जत् - कनकरजःपिशंगदीप्तिः ।
प्रत्यग्रद्युमणिमयूख - जाल - शोभा-
माधत्ते दिशि दिशि कौङ्कुमः परागः ॥५॥

तदेनं वर्तमानं प्रभवे निवेदयामि ।

(ततः प्रविशति विविक्तस्थानमधिवसन् हिमवान्)

हिमवान्—

पूर्वं नारदसूचनेन महता चन्द्रार्धचूडामणि-
र्जामातेत्यभवत् पुनस्तदनु तत् संप्राप्तिराकाङ्क्षिता ।
लब्धोऽसौ तपसा मया दिनमिदं तस्याश्च वैवाहिकं,
जातो विघ्नगणानतीत्य कृतिनामद्याहमग्रेसरः ॥६॥

शिलाधरः—(उपसृत्य) जयतु स्वामी ।

हिमवान्—किं पुरपरिष्कारः प्रवर्तितो भवता ?

शिलाधरः—स्वामिन् ! अस्मदीयोऽयमुत्सव इति प्रत्येकं पौराणामभिमानः । कथं परिहीयते पुरपरिष्कारः

सर्वं द्विगुणमाचरितं पौरैः ।

हिमवान्—शिलाधर ! किं सर्वे पर्वता पार्वतीपरिग्रह-मङ्गलं द्रष्टुमागताः ?

शिलाधरः—स्वामिन् अवधार्यताम् ।

भूपङ्केरुह-कर्णिकायिततनुर्मेरुः सुराणां प्रियो,
योक्त्रीभूतभुजङ्गराजकषणस्निग्धोपलो मन्दरः ।
विन्ध्यो व्योमनि भानुमालिपदवी-जङ्घाल-शृङ्गावली,
साकं सम्प्रति गन्धमादनमुखैस्त्वां द्रष्टुमभ्यागताः ॥७॥

हिमवान्—अथ कैलाशः किं करोति ?

शिलाधरः—स्वामिन् ! स खलु जामातृपक्षस्थितेनैव सार्धमागमिष्यति ।

हिमवान्—युज्यते, अथ विश्वावसुप्रभृतय आगता गन्धर्वाः सवधूगणाः ?

शिलाधरः—आतोद्यपाणयः सर्वे गन्धर्वाः सवधूगणाः ।
उपवीणयितुं प्राप्ता मानयन्तस्तवोत्सवम् ॥८॥

हिमवान्—आगता किमप्सरसः सार्धममरैः ?

शिलाधरः—श्रूयताम् ।

विद्युद्वल्लीवितानव्यतिकरसुषमां व्योम्नि विस्तारयन्त्यः ।
कान्त्या नीलोत्पलानां श्रियमिव नयनैर्दिङ्मुखैर्दर्शयन्त्यः ।
ज्योत्स्नालक्ष्मीं दिवापि स्मितरुचिविसरैर्विष्वगुत्पादयन्त्यः,
सर्वाः स्वर्वारयोषाः समममरगणैरागताः प्रीतये नः ॥९॥

हिमवान्—यद्येवमन्तःपुरं गत्वा भवान् कुलवृद्धां कौशिकीं पुरस्कृत्य समागताभिरप्सरोभिर्वत्सा पार्वती सम्यगलंक्रियतामित्यभिधत्ताम् । किञ्चागतानां वधूनां गिरीणाञ्च सत्कृतये तत्रभवता संविधातव्यः सकललोक-वस्तुसम्भारः ।

शिलाधरः—यथादिष्टं स्वामिना तथा सर्वं सम्पाद-यिष्यामि ।

[इति निष्क्रान्तः]

अभ्यास

१. सप्तर्षि कौन थे ? उन्हें किसने किस लिए भेजा था ? नगर की शोभा का वर्णन अपनी भाषा में लिखिए ।

२. भूपङ्केरुहकर्णिकायिततनुः—इत्यादि पद्य में जिन कथाओं की ओर संकेत किया गया है, उन्हें संक्षेप में लिखिए ।

३. प्रकृति-प्रत्यय विश्लेषण कीजिए—

सन्नह्यन्ताम्, उन्नीयन्ताम्, संसिच्यन्ताम्, उत्सर्पन्, आधत्ते, अधिवसन्, अतीत्य।

४. विग्रह सहित समासों के नाम लिखिए—

शतमन्युशरासनश्रीः, पटीरद्रवभरितजलैः, पार्वतीपरिग्रह-मङ्गलम्, योक्त्रीभूतभुजङ्गराजकषणस्निग्धोप[illegible] आतोद्यपाणयः।

५. वाच्यपरिवर्तन कीजिए—

पौरैः सर्वम् आचरितम्।